

# सोमज्योतिः

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य त्रैमासिकं वार्तापत्रम्

Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval - 362 266. Gir - Somnath (Gujarat)
Ph. : 02876-244532 Fax : 02876-244417 Website : www.sssu.ac.in

खैस्ताबदः २०२० | वैक्रमाब्दः २०७७ | संयुक्ताङ्कः-२५-२६ | जुलाई-डिसेम्बर २०२०

## कुलपतिवाक्



आत्मीयमित्राणि !

श्रीसोमनाथं शरणं प्रपद्ये ।

"सोमज्योतिः" अस्मिन् कोरोना-तमोऽभिभूते काले स्वधर्ममाचर्य प्रवर्तत इति एतस्याङ्कस्य सर्वेभ्यः सम्पादनदायित्ववद्भ्यः आचार्येभ्यः तथा च वार्तापत्रस्यैतस्य कृते विविधवार्तादानेन चित्रादिप्रेषणेन एतत्पुरस्कारयद्भ्यः विविधमहाविद्यालयानां प्रधानाचार्येभ्यः परिसरगतेभ्यः छात्राध्यापक-पदाधिकारिकर्मचारिभ्यश्च भूयो भूयः साधुवादाः विज्ञाप्यन्ते ।

कोरोनाजन्यं प्रातिकूल्यं नाभविष्यच्चेद् इदानीं विश्वविद्यालयपरिसरे अन्यत्र सर्वेषु महाविद्यालयेषु च छात्राणां साक्षादुपस्थित्या यादृशं रम्यं सक्रियं च दृश्यम् अभविष्यत्, तदिदानीं नास्ति । किन्तु, एष मार्गः सम्प्रति पिहितश्चेत् मानवेनैव उद्भावितः यान्त्रिकः अन्तर्जालगतो मार्ग उद्घाटितः । न केवलम् उद्घाटितम्, अपि तु तेन भौतिकोपस्थित्या यत् कर्तुम् अकर्तुम् अन्यथा कर्तुम् इष्टं स्यात् तदपेक्षया समधिकं सर्वं किमपि साध्यमानम् अस्ति । एतया रीत्या नियमिततया अध्यापकानाम् अध्यापनकार्यं प्रचलति, अनेकानि व्याख्यानानि, विविधाः कार्यक्रमाः (सामान्यरीत्या येषां निर्वहणे महान् अर्थव्ययः मानवसंसाधनाधिक्यापेक्षा चापेक्ष्यते) आयोजिताः । प्रथमवारं विश्वविद्यालयस्य पूर्वच्छात्रसम्मेलनं कृतम्, संस्कृतसप्ताहः तदङ्गत्वेन विविधाः प्रतियोगिताः, प्रथमवारं शताधिकजनानां विशिष्टानां महानुभावानां च "संस्कृतस्य कृते गौरवमनुभवामि" इति शीर्षकेण दृश्यश्रव्यसामग्रीनिर्माणपूर्वकं वितरणम्, "दिगन्तव्यापिनीं वाणीं वयं कुर्याम संस्कृताम्" इति शीर्षकेण पद्मश्रीचमूकृष्णशास्त्रिणः व्याख्यानम्, श्रीगोविन्दगुरुविश्वविद्यालयेन सह संयुक्ततत्त्वावधानेन "नटराजवन्दना" इति शीर्षकेण विविधविदुषां व्याख्यानानि, "रामायण के द्वारा व्यक्तित्वविकास" एवं च "कथं पठेम – रघुवंशम्- द्वितीयः सर्गः" इति आनलाईन- अल्पकालीन (मासत्रयावधिक) – पाठ्यक्रमद्वयस्य प्रारम्भः, महामहोपाध्याय के.का. शास्त्रिपादानां स्मृतौ पाक्षिकव्याख्यानमालायाः शुभारम्भः, नवीनराष्ट्रियशिक्षानीतिसन्दर्भे विविधगोष्ठीषु चर्चा, माइक्रोसोफ्ट - द्वारा सर्वकारीययोजनान्तर्गतपाठसञ्चालनम्, कतिपय "डिप्लोमा" – पाठ्यक्रमान् अनुसृत्य दूरस्थशिक्षणविधेः सञ्चालनाय पाठ्यांशलेखनविध्यारम्भः इत्यनेकविधाः प्रकल्पाः कार्यक्रमाः शैक्षणिकविधयश्च प्रारब्धाः आयोजिताः संचालिताश्चेति महतः प्रमोदस्यायं विषयः । एतदर्थं निरन्तरतया स्वकीयम् उत्तरदायित्वं ये निरूढवन्तः तेभ्यः सर्वेभ्यः भूरिशः अभिनन्दनानि वर्धापनानि च व्याह्रियन्ते ।



गुजरातराज्यस्य माननीय-मुख्यमन्त्रिणा सह
माननीय-कुलपतिवर्यस्य कुलसचिववर्यस्य च मेलनम्

सर्वथा महत्त्वपूर्णो विषयो नाम शास्त्री- अन्तिमवर्षस्य आचार्य - प्रथमस्य द्वितीयस्य च वर्षस्य अन्तिमाः परीक्षाः याः अवशिष्टाः आसन् ताः अगस्तमासे प्रतिदिनं परीक्षात्रयं तच्च प्रतिपरीक्षं घण्टात्रयस्य स्थाने घण्टाद्वयमिति सर्वकारीयनियमनं परिपाल्य सम्पूर्णे गुजरातप्रान्ते संचालिताः, कोरोना-भीतिकालेऽपि प्रायः अशीतिप्रतिशतं छात्राः भागं गृहीत्वा एतल्लक्ष्यपूर्तये सुतराम् अग्रेसराः जाताः इति ते भूरिशो वर्धापनीयाः सन्ति ।

विश्वविद्यालयपरिसरे विविधप्रकारकं भौतिकभवननिर्माणकार्यमपि एतेषु दिवसेषु चलितमासीत् सम्प्रति प्रचलदपि विद्यते । तदर्थं कुलसचिववर्यतः आरभ्य सर्वेऽपि पदाधिकरिणः कर्मचारिणश्च धन्यवादैः पुरस्क्रियन्ते ।

सर्वे मिलित्वा अग्रे चलामः, विश्वविद्यालयस्य गौरवं न केवलं प्रान्ते अपि तु सम्पूर्णे राष्ट्रे, अखिले च विश्वपटले वर्धापयामः ।

श्री सोमनाथो विजयतांतराम् ।

(प्रो. गोपबन्धु मिश्र)
कुलपतिः

प्रधानसम्पादकः
प्रो. गोपबन्धु मिश्रः
कुलपतिः

प्रकाशकः
डॉ. दशरथ जादवः
कुलसचिवः

प्रबन्धसम्पादकः
श्री रवीन्द्र एस. काले
ग्रन्थपालः

सम्पादकाः
डॉ. नरेन्द्रकुमार एल. पण्ड्या
डॉ. ललितकुमार ए. पटेलः
डॉ. दीपेश विनोद कतिरा
डॉ. जानकीशरण आचार्यः
श्री जिगर भट्टः

News/Reports of events are invited for their publication in **SOMAJYOTIḤ** (Quarterly Newsletter of Shree Somnath Sanskrit University) from affiliated colleges, recognized study centers & approved research centers of Shree Somnath University in Sanskrit, Hindi or English.
News/Reports of events can be sent on following mail/postal address:

Address:
The Editor
"SOMAJYOTIḤ"
Shree Somnath Sanskrit University
Rajendra Bhuvan Road, Veraval,
Dist Gir Somnath, Gujarat - 362 266.
(O) 02876 - 244532
E-mai: editor.somjyoti@sssu.ac.in

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य जालपुटेऽपि ''सोमज्योतिः'' द्रष्टुं शक्यते - www.sssu.ac.in

Statement about the ownership and other particulars about newspapers
**SOMAJYOTIḤ**
FORM IV
(See Rule 8 under Section 5 of the Press and Registration of Book Act,1867)
1. Place of the Publication : Shree Somnath Sanskrit University Veraval, Gujarat – 362266
2. Periodicity of its Publication : Quarterly
3. Printer's Name : Jalaram Graphics & Offset
Nationality : Indian
Address : Behind Hotel Kaveri, Veraval-362266
4. Publisher's Name : The Registrar
Nationality : Indian
Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
5. Editor's Name : Prof. Gopabandhu Mishra
Nationality : Indian
Address : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
6. Names & Addresses of Individuals who own the newspaper and partners or shareholders holding more than one percent of the total capital : Shree Somnath Sanskrit University Rajendra Bhuvan Road, Veraval, Dist. Gir-Somnath, Gujarat–362266
I, Dr. Dashrath Jadav, Registrar, Shree Somnath Sanskrit University, Veraval, Gujarat hereby declare that the particulars given above are true to the best of my knowledge and belief.
Dr. Dashrath Jadav
Signature of Publisher

# श्रीसोमनाथसंस्कृतविश्वविद्यालयः

राजेन्द्रभुवनमार्गः, वेरावलम्-३६२ २६६, गीरसोमनाथ-जनपदः (गुजरातम्)
दूरभाषः ०२८७६-२४४५२८/२९/३२ फेक्स – २४४४१७,
वेबसाइट www.sssu.ac.in Email: sssu.veraval@gmail.com

## अभ्यासक्रमः शुल्क-विवरणं च

| क्रमः | अभ्यासक्रमाः | विषयाः | न्यूनतम-योग्यता | अवधिः | शुल्कम्* (Boys) | शुल्कम्* (Girls) |
|---|---|---|---|---|---|---|
| १ | विद्यावारिधिः (Ph.D.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, दर्शनम्, व्याकरणम् | आचार्यः/ M.A. 55% अङ्कैः सह | Min 3 Year Max 6 Year | 24,800 | 24,800 |
| २ | तत्त्वाचार्यः (M.Phil.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, दर्शनम्, व्याकरणम् | संस्कृते आचार्यः /M.A. | १ Year | 4400 | 4400 |
| ३ | आचार्यः (M.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | संस्कृत-मुख्य-विषयेन सह स्नातकोपाधिः | 2 Year | 3800 | 1400 |
| ४ | (M.A.) | योगः | स्नातकोपाधिः | 2 Year | 7200 | 7200 |
| | | संस्कृतम् (General Hindu Studies) | स्नातकोपाधिः | 2 Year | to be fixed | to be fixed |
| ५ | संयुक्त-शास्त्रि-शिक्षाशास्त्री (Integrated B.A., B.Ed.) | संस्कृतम् | १२तमा कक्षा | ४ Year | to be fixed | to be fixed |
| ६ | शास्त्री (B.A.) | साहित्यम्, वेदः, पुराणम्, ज्योतिषम्, सर्वदर्शनम्, व्याकरणम् | १२तमा कक्षा | ३ Year | 5500 | 1900 |
| ७ | पदविका (Diploma) | योगः, ज्योतिषम्, कर्मकाण्डम्, संस्कृतशिक्षणम्, मन्दिरव्यवस्थापनम् वास्तुशास्त्रम् | १२तमा कक्षा | १ Year | *500 | *500 |

प्रवेशाय सम्पर्कं कुर्वन्तु-

- डॉ. नरेन्द्रकुमार पण्ड्या, प्रधानाचार्यः, ९८९८५४०४०३
- डॉ. पङ्कजकुमार रावलः, अध्यापकः, ९८७९३२९८९८
- श्री जयदीपसिंह परमार, जु. क्लर्क, ७३५९५१७४००
- डॉ. ललितकुमार पटेलः, अध्यक्षः, ९८७९८३४०७१
- डॉ. दीपेश कतिरा, अध्यापकः, ९५९४३५६८५७
- श्री करसन छात्रोडिया, जु. क्लर्क, ९८२४९६६०२२

अत्र निर्दिष्टं शुल्कं समग्रस्य अभ्यासक्रमस्य कृते अस्ति । *एतत् मुख्यकेन्द्रे स्वीक्रियमाणं शुल्कम् अस्ति ।
✲ परीक्षा-शुल्कम् - प्रतिसत्रम् - शास्त्री ६५०/-, आचार्य : ७००/-, डिप्लोमा ५००/-

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०५-०७-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते ओनलाईन गुरुपूर्णिमामहोत्सवे अध्यक्षत्वेन उपस्थितिः |
| ०७-०७-२०२० | महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयेन (हरियाणा) आयोजितायाम् ओनलाईन विद्वत्परिषदि सदस्यत्वेन भागग्रहणम् |
| १०-०७-२०२० | एम्.एस्. कलाभवनम्, मुजफ्फरपुरम्, बिहारम् इत्यनेन "कोरोना महामारी तथा भारतीय संस्कृति" इति विषयमादाय आयोजिते ओनलाइन वेबिनार कार्यक्रमे वक्तृत्वेन भागग्रहणम् |
| १०-०७-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ओनलाइन पूर्वच्छात्रसम्मेलने अध्यक्षत्वेन उद्घाटकत्वेन च उपस्थितिः |
| ११-०७-२०२० | जवाहरलाल नहेरु विश्वविद्यालय – देहली JNU इत्यनेन आयोजितायाः प्रो. वाचस्पति उपाध्याय – ओनलाइन व्याख्यानमालायाः उद्घाटकत्वेन उपस्थितिः |
| १४-०७-२०२० | जवाहरलाल नहेरु विश्वविद्यालय – देहली JNU इत्यत्र संस्कृतविभागस्य सहाचार्यनियुक्तयिसमितौ विषयविशेषज्ञत्वेन ओनलाइन उपस्थितिः |
| १६-०७-२०२० | माननीय-मुख्यमंत्रि-द्वारा सोमनाथन्यासनिर्मितस्य माहेश्वरीभवनस्य ई-लोकार्पणकार्यक्रमे उपस्थितिः |
| १७-०७-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितस्य मासव्यापिनः ओनलाइन सम्भाषणवर्गस्य समापने अध्यक्षत्वेन उपस्थितिः |
| १८-०७-२०२० | महाविद्यालयानां प्राचार्यैः सह ओनलाइन गोष्ठ्याम् अध्यक्षत्वेन उपस्थितिः |
| २१-०७-२०२० | आदित्यबिरलाविद्यालयेन सरस्वतीविद्यालयेन (वेरावल) च आयोजिते आत्मनिर्भर-भारतम् इति विषयस्य ओनलाइन कार्यक्रमे अध्यक्षत्वेन उपस्थितिः |
| २३-०७-२०२० | वर्तमानपरिस्थितौ छात्राणां प्रवेशप्रक्रियायाः कृते, परीक्षायाः कृते योजनार्थम् उच्चशिक्षणविभागस्य अध्यक्षेण सह ओनलाइन-उपवेशने भागग्रहणम् |
| २५-०७-२०२० | उत्तरप्रदेशनागकूपशास्त्रार्थसमितिः, काशी इत्यनेन आयोजितायाम् ओनलाइन शास्त्रार्थशोधसंगोष्ठ्यां मुख्यवक्तृत्वेन विशिष्टव्याख्यानप्रदानम् |
| २६-०७-२०२० | राणी-दुर्गावती-विश्वविद्यालयः, जबलपुरम् इत्यस्य संस्कृतविभागेन आयोजिते "भारतीय संस्कृति में आत्मनिर्भर भारत" इत्यस्मिन् ओनलाइन कार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः |
| २७-०७-२०२० | बाबासाहेब आंबेडकर मुक्तविश्वविद्यालयेन (अहमदाबाद) आयोजितस्य ओनलाइन संस्कृतसम्भाषणसप्ताहस्य उद्‌घाटनमकार्यक्रमे मुख्यातिथित्वेन उपस्थितिः |
| २७-०७-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् तथा श्रीगोविन्दगुरुविश्व-विद्यालयः, गोधरा इत्यनयोः संयुक्तोपक्रमेण आयोजितायां नटराजवन्दनायाम् अध्यक्षत्वेन उपस्थितिः |
| २८-०७-२०२० | "संस्कृतशौर्यम्" इत्यनेन समूहेन आयोजिते ओनलाइन कार्यक्रमे "संस्कृतसम्भाषणं किमर्थम्" इति विषयमादाय मुख्यवक्तृत्वेन व्याख्यानप्रदानम् |
| २९-०७-२०२० | देव-संस्कृत-विश्वविद्यालयः, हरिद्वारम् इत्यस्य विद्यावारिधेः ओनलाइन मौखिकपरीक्षणे परीक्षकत्वेन उपस्थितिः |
| ३१-०७-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितस्य ओनलाइन संस्कृतसप्ताहोत्सव- स्य उद्घाटने अध्यक्षत्वेन उपस्थितिः |
| ०३-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितयोः अल्पकालीनप्रमाणपत्रीय- पाठ्यक्रमयोः "रघुवंशं (द्वितीयसर्गः) कथं पठेम" तथा "रामायण एवं व्यक्तित्वविकास" इत्यनयोः ओनलाइन उद्घाटनप्रसङ्गे अध्यक्षत्वेन उपस्थितिः |
| ०४-०८-२०२० | केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरेण (त्रिपुरा) आयोजिते ओनलाइन कार्यक्रमे मुख्यवक्तृत्वेन "शास्त्राणां लोकोपकारकता" विषयमादाय व्याख्यान- प्रदानम् |
| ०६-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितस्य ओनलाइन संस्कृतसप्ताहोत्सव- स्य समापनप्रसङ्गे अध्यक्षत्वेन उपस्थितिः |
| ०८-०८-२०२० | Vivek Multivision Foundation, Mumbai द्वारा आयोजिते कार्यक्रमे मुख्यवक्तृत्वेन "Importance of Sanskrit Grammer" विषयमादाय व्याख्यानप्रदानम् |
| ०८-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितायाः ओनलाइन श्रीके.का.शास्त्रि-पाक्षिकव्याख्यानमालायाः उद्घाटन-प्रसङ्गे अध्यक्षत्वेन उपस्थितिः |
| १०-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते ओनलाइन विश्वसिंहदिवसे अध्यक्षत्वेन उपस्थितिः |
| १०-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते अल्पकालीनप्रमाणपत्रीयपाठ्यक्रमे "रामायण में वर्णित जीवनमूल्य एवं रामराज्य की अवधारणा" इति विषयमादाय व्याख्यानप्रदानम् |

| | |
|---|---|
| १४-०८-२०२० | सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयस्य राष्ट्रियशिक्षानीतिसमितौ सदस्यत्वेन उपस्थितिः |
| १४-०८-२०२० | संस्कृतभारतीविद्वत्परिषद्, देहली द्वारा आयोजितायाः प्रत्यभिज्ञादर्शन-कार्यशालायाः उद्घाटनसत्रे मुख्यातिथित्वेन उपस्थितिः |
| १५-०८-२०२० | ७४ तमे स्वातन्त्र्यदिवससमारोह श्रीसोमनाथसंस्कृतविश्वविद्यालयपरिसरे अध्यक्षत्वेन उपस्थितिः |
| १७-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकैः सह "राष्ट्रिय-शिक्षानीतौ संस्कृतविश्वविद्यालयानां भूमिका" विषये चर्चायाम् अध्यक्षत्वेन उपस्थितिः |
| १८-०८-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते "नवीना राष्ट्रियशिक्षानीति: संस्कृतं च" इति कार्यक्रमे अध्यक्षत्वेन उपस्थितिः |
| २७-०८-२०२० | केन्द्रियसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरेण आयोजिते राष्ट्रियशिक्षानीतिविषयके कार्यक्रमे वक्तृरूपेण “राष्ट्रियशिक्षानीति: संस्कृतं च” विषये व्याख्यानम् |
| २८-०८-२०२० | गुजरातराज्यस्य माननीय-शिक्षणमन्त्रिणः राष्ट्रियशिक्षानीतिविषयकचर्चासत्रे उपस्थितिः |
| ०३-०९-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य शैक्षणिकपरिषदः ३५ तमे उपवेशने अध्यक्षत्वेन उपस्थितिः |
| ०५-०९-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कार्यकारिणीपरिषदः ६७ तमे उपवेशने अध्यक्षत्वेन उपस्थितिः |
| ०७-०९-२०२० | माननीयराष्ट्रपतेः माननीयप्रधानमन्त्रिणः च राष्ट्रियशिक्षानीतेः ओनलाइन चर्चायाम् उपस्थितिः |
| ०९-०९-२०२० | ICCR, Delhi इत्यस्य अभ्यासक्रमचर्चायाम् उपस्थितिः |
| १२-०९-२०२० | सौराष्ट्रसंस्कृत-अध्यापक-परिषदः ओनलाइन व्याख्यानमालायाः समापने अध्यक्षत्वेन उपस्थितिः |
| १४-०९-२०२० | बनारस-हिन्दू-विश्वविद्यालयेन आयोजितायां राष्ट्रिय-शिक्षानीतेः अङ्गतया शिक्षकाणां प्रशिक्षणयोजनायाः आयोजनचर्चायां वक्तृत्वेन उपस्थितिः |
| १७-०९-२०२० | गुजरात-विश्वविद्यालयेन आयोजिते "राष्ट्रिय-शिक्षानीतिः संस्कृतं च" कार्यक्रमे मुख्यवक्तृत्वेन उपस्थितिः |
| १९-०९-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते SSIP अन्तर्गतम् ओनलाइन चर्चासत्रे अध्यक्षत्वेन उपस्थितिः |
| १९-०९-२०२० | शास्त्रिप्रथमवर्षीयच्छात्रै: सह ओनलाईन वार्ता |
| २१-०९-२०२० | पाठशालानां प्रधानाचार्यै: सह "संस्कृत पाठशाला एवं राष्ट्रिय शिक्षा नीति-२०२०" इति चर्चासत्रे अध्यक्षत्वेन उपस्थितिः |
| ०६-१०-२०२० | माननीयशिक्षणमन्त्रिणा सह सामान्यवार्षिकायोजनचर्चायाम् उपस्थितिः |
| १६-१०-२०२० | केन्द्रियसंस्कृतविश्वविद्यालयस्य भोपालपरिसरेण आयोजिते राष्ट्रियशिक्षानीतिविषयके कार्यक्रमे वक्तृत्वेन "संस्कृतशिक्षायां राष्ट्रियशिक्षानीते: क्रियान्वयनम्" इति विषयमादाय व्याख्यानम् |
| १७-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितयोः अल्पकालीनप्रमाणपत्रीयपाठ्यक्रमयोः "संस्कारों का मानवजीवन पर प्रभाव" तथा "संस्कृत वाक्यसंरचना का अभ्यास एवं कौशल्य" इत्यनयोः ओनलाइन उद्घाटनप्रसङ्गे अध्यक्षत्वेन उपस्थितिः |
| १९-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते अल्पकालीनप्रमाणपत्रीयपाठ्यक्रमे "कारकं किम् ? कारकाणि कति?" इति विषयमादाय व्याख्यानप्रदानम् |
| २३-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते अल्पकालीनप्रमाणपत्रीयपाठ्यक्रमे "संस्कारो का महत्त्व" इति विषयमादाय व्याख्यानप्रदानम् |
| २४-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालये परिसरे कुलसचिवभवनस्य शिक्षाशास्त्रिभवनस्य शिलान्यासे, सङ्गोष्ठीकक्षस्य च उद्घाटने अध्यक्षत्वेन उपस्थितिः |
| २६-१०-२०२० | माननीयराज्यपालवर्याणां राष्ट्रियशिक्षानीतेः कार्यक्रमे उपस्थितिः |
| २७-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते व्याकरणविषयके वेबिनारकार्यक्रमे अध्यक्षत्वेन उपस्थितिः |
| २८-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते साहित्यविषयके वेबिनारकार्यक्रमे अध्यक्षत्वेन उपस्थितिः |
| ३१-१०-२०२० | श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते सरदारपटेलजयन्त्याः ओनलाइन व्याख्यानकार्यक्रमे अध्यक्षत्वेन उपस्थितिः |
| ०३-११-२०२० | सरदारपटेलविश्वविद्यालयेन आयोजिते ओनलाइन वेबिनारकार्यक्रमे वक्तृत्वेन Indian knowledge System Vyakarans the Science & Language in Indian perspective इति विषयमादाय व्याख्यानप्रदानम् |
| ०६-११-२०२० | छात्राणां परिसरे आगमनविषये माननीयशिक्षणमन्त्रिणा सह ओनलाइन उपवेशने उपस्थितिः |
| ०७-११-२०२० | Online Meeting with Dr. Anna Esposito for Lectures in Wurzburg |

१०-११-२०२० केन्द्रियसंस्कृतविश्वविद्यालयस्य गङ्गानाथझापरिसरेण आयोजितायाः पाठसम्पादनकार्यशालायाः उद्घाटने मुख्यातिथित्वेन उपस्थितिः

१२-११-२०२० Saint Exupery's, Germany Le Petit Prince in Sanskrit an introduction by the translator, Wurzburg University, Germany

१९-११-२०२० माननीयशिक्षणमन्त्रिणा सह राज्यस्य कुलपतीनाम् ओनलाइन चर्चासत्रे भागग्रहणम्

१९-११-२०२० Panini's Grammar A traditional knowledge system, Germany

२६-११-२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते ओनलाइन मतदातृ-जागृति-कार्यक्रमे उपस्थितिः

२६-११-२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयेन संविधानदिवसस्य अङ्गतया आयोजिते ओनलाइन व्याख्याने अध्यक्षत्वेन उपस्थितिः

२७-११-२०२० 'संस्कृते अध्ययनम् अध्यापनम् – भारते जर्मनीदेशे च" इति ओनलाइन चर्चासत्रे भागग्रहणम्

२८-११-२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयेन वित्तसमितेः उपवेशने अध्यक्षत्वेन उपस्थितिः

२९-११-२०२० संस्कृतभारत्याः गोष्ठ्याम् "संस्कृतस्य विकासेन राष्ट्रस्य विकासः" इति विषये अध्यक्षत्वेन व्याख्यानप्रदानम्

११/१२/२०२० शास्त्रपरिचयप्रकल्पान्तर्गतं सज्जानां ३६ विडिओ-पाठानां लोकार्पणकार्यक्रमे अध्यक्षत्वेन उपस्थितिः

१२.१२.२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते दिव्याङ्गजागृति-अभियानम् इति कार्यक्रमे अध्यक्षत्वेन उपस्थितिः

२३/१२/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पुराणविषयके परिसंवादे अध्यक्षत्वेन उपस्थितिः

२४/१२/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य वेदविषयके परिसंवादे अध्यक्षत्वेन उपस्थितिः



गुजरातसाहित्याकादम्याः अध्यक्षः डॉ. विष्णुपण्ड्यामहोदयः, माननीयः कुलपतिवर्यः, कुलसचिववर्यः च



माननीयशिक्षणमन्त्रिणा सह माननीयकुलपतिः कुलसचिवमहोदयः च



अम्बेडकर मुक्तविश्वविद्यालयस्य सर्वकारचितेन सदस्येन जयेशमहोदयेन सह माननीयः कुलपतिः प्रधानाचार्यः च



पूर्वमुख्यमन्त्रिणः श्रीकोशुभाई-पटेलस्य शोकसभायां श्रद्धापुष्पम् अर्पयन् माननीयः कुलपतिवर्यः


# गुरुपूर्णिमा






श्रावणी पूर्णिमा सर्वत्र गुरुपूर्णिमा व्यासपूर्णिमा च कथ्यते। प्रतिवर्षं श्रीसोमनाथसंस्कृतविश्विद्यालयः गुरुपूर्णिमायाः आयोजनं करोति किन्तु अस्मिन् वर्षे ०५/०७/२०२० तमे दिनाङ्के कोरोनाकारणेन ओनलाइन गुरुपूर्णिमा आयोजिता। विश्वविद्यालयस्य परिसरे वर्तमानायाः भगवतः वेदव्यासस्य प्रतिमायाः पूजनं पुराणविभागस्य अध्यापकेन डॉ. पङ्कजकुमाररावलमहोदयेन अकारि। ततश्च विश्वविद्यालयस्य माननीय-कुलपतेः प्रेरणया तथा आयोजकानां मार्गदर्शनेन अपराह्णे ०४ वादनतः ०५ वादनपर्यन्तम् एकं विशिष्टं व्याख्यानम् आयोजितम्। व्याख्यातृरूपेण मोरबी नगरस्थ खोखराहनुमत्स्थानस्य महामण्डलेश्वरी परमपूज्या श्रीकनकेश्वरीदेवी गुरोः गुणमण्डनसहितं व्याख्यानम् अकरोत्। भारतीया शिक्षणपद्धतिः गुरुशिष्यपरम्परया एव अतीव उत्तमा उच्यते अतः गुरुशिष्यपरम्परायाः महत्त्वं सम्प्रति सर्वैः स्वीकरणीयम् इति वचस्सहितं तस्याः भाषणम् आसीत्। ततश्च विश्वविद्यालयस्य मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः अध्यक्षीयम् अभाषत। महामण्डलेश्वर्याः धन्यवादकथनेन सह कुलपतिवर्येण व्यासपूर्णिमायाः महत्त्वम् अवादि। अस्मिन् प्रसङ्गे शास्त्रितृतीयवर्षस्य छात्रः दवे नीलः गुर्वष्टकं दक्षिणामूर्तिस्तोत्रं च प्रस्तुतवान्। आचार्यप्रथमवर्षस्य छात्रः रविः रादडिया गुरुमहिमानम् अवदत्। अस्य कार्यक्रमस्य संयोजनं डॉ. पङ्कजकुमारः रावलः तथा अपूर्वा अग्रवालः अकुरुताम्।







# पूर्वच्छात्रसम्मेलनम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १०/०७/२०२० तमे दिनाङ्के ओनलाइन "पूर्वच्छात्रसम्मेलनम्" आयोजितम्। एतस्य सम्मेलनस्य हेतुः अस्ति यत् विश्वविद्यालयपरिसरे ये छात्राः पठितवन्तः सन्ति तेषाम् एकवारं मेलनं स्यात्, ते कुत्र वर्तन्ते, किं च कुर्वन्ति, कां वृत्तिं कृत्वा संस्कृतस्य विश्वविद्यालयस्य च प्रतिनिधित्वं कुर्वन्ति, इत्यादि ज्ञातुम्। अयम् अतीव आनन्दस्य विषयः यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वच्छात्राः आरक्षकदले, अध्यापनक्षेत्रे, व्यावहारिकक्षेत्रे, स्वतन्त्रव्यवसायक्षेत्रे, कर्मकाण्डक्षेत्रे, योगप्रशिक्षणक्षेत्रे तथा अन्येषु विविधेषु क्षेत्रेषु आजीविकां प्राप्य संस्कृतस्य प्रातिनिध्यं कुर्वन्तः सन्ति। अस्मिन् ओनलाइन पूर्वच्छात्रसम्मेलने प्रायः ६५ पूर्वच्छात्राः सहभागिनः समभवन्।

अस्मिन् कार्यक्रमे सर्वादौ अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमार-पटेल-महोदयः कार्यक्रमस्य प्रास्ताविकं प्रस्तूय सर्वेषां स्वागतम् अकरोत्। ततश्च श्रीसोमनाथसंस्कृतविश्वविद्यालय-सञ्चालित-महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयः प्रासङ्गिकम् उद्बोधनम् अकरोत्। तेन छात्राणाम् उत्तरोत्तरविकासाय आशीः प्रदत्ता, श्रीसोमनाथश्च प्रार्थितः। क्रमेणास्मिन् विश्वविद्यालयस्य कुलसचिवः डॉ. दशरथ-जादव-महोदयः अपि प्रासङ्गिकम् उद्बोधनं कृत्वा, विविधक्षेत्रेषु वर्तमानानां सेवारतानां छात्राणां मार्गदर्शनं कृतं शुभाशयाश्च ज्ञापिताः।

पूर्वच्छात्राणां सम्मेलनम्, अतः पूर्वच्छात्राणाम् अभिप्रायोऽपि ज्ञातव्यः। श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वच्छात्राणां प्रतिनिधिरूपेण चत्वारः पूर्वच्छात्राः स्वविचारान् प्रकटीकृतवन्तः। तत्रादौ अरुणकुमारः पाण्डेयः,ततश्च क्रमेण राहुलकुमारः झा, संहिता जानी, अखिलः राज्यगुरुः च स्वमनोभावान् सर्वेषां समक्षं प्रस्तूय विश्वविद्यालयं प्रति कृतज्ञतां प्रकटितवन्तः।

अध्यक्षरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यः कुलपतिवर्यः प्रो. गोपबन्धु-मिश्र-महोदयः समभाषत। विश्वविद्यालयस्य छात्राः विविधेषु क्षेत्रेषु सन्ति इति ज्ञात्वा तेन हर्षः प्रकटितः। अस्य विश्वविद्यालयस्य प्रतिनिधिरूपाः छात्राः एव सन्ति, तेषाम् इतोऽपि विकासः स्यात्, सर्वत्र ते आदृत्याः सम्मान्याः विशिष्टाश्च भवेयुः, इति आशीः प्रदाय छात्रेभ्यः शुभकामनाः प्रदत्ताः।

अस्य कार्यक्रमस्य अन्ते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूर्वच्छात्रः तथा सम्प्रति वेदविभागस्य अध्यापकः श्रीविपुल-जादवः धन्यवादज्ञापनम् अकरोत्। कार्यक्रमस्य सञ्चालनम् अस्यैव विश्वविद्यालयस्य पूर्वच्छात्रः तथा सम्प्रति साहित्यविभागे अध्यापकः श्रीजिगर-भट्टः अकरोत्। अस्य कार्यक्रमस्य संयोजकाः डॉ. जयेशकुमार-मुंगरा, डॉ. आशा माढकः, श्रीविपुल-जादवः, श्रीजिगर-भट्टः, श्रीनित्यानन्द-ओझा, कु. अपूर्वा-अग्रवालः च आसन्। एतैः सफलतापूर्वकम् अस्य कार्यक्रमस्य आयोजनम् अक्रियत।

एतस्य कार्यक्रमस्य आयोजनम् ओनलाइन वेबेक्स माध्यमेन अभवत् तथा फेसबूक उपरि प्रसारणम् अपि जातम् आसीत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य सर्वेऽपि अध्यापकाः सहर्षं भागं गृहीतवन्तः। अन्ते विश्वविद्यालयस्य पूर्वच्छात्रसमितेः सदस्यतायाः उद्घोषणा जाता, अस्यां समितौ सर्वेऽपि पूर्वच्छात्राः तथा अध्यापकाः सदस्यताशुल्कं पूरयित्वा सदस्याः भवेयुः इति सूचना प्रदत्ता। एवम् एषः कार्यक्रमः सफलतया आयोजितः।

## मासव्यापी संस्कृतसम्भाषणवर्गः

श्रीसोमनाथसंस्कृतविश्वविद्यालये अस्मिन् वर्षे प्रविष्टानां छात्राणां संस्कृतसम्भाषणज्ञानाय १७/०७/२०२० तः आरभ्य एकमासं यावत् निरन्तरं संस्कृतसम्भाषणवर्गः आयोजितः। एषः वर्गः सम्पूर्णतया ओनलाइन आसीत् अतः छात्राः गृहे स्थित्वा एव समक्षमिव सम्भाषणं पठितवन्तः। एतत् सम्भाषणपठनम् अतीव रुचिकरं स्यात् तदर्थम् अध्यापकद्वयस्य उत्तरदायित्वे वर्गसञ्चालनम् आयोजि। डॉ.दीपेशः कतिरा तथा श्रीजिगरः भट्टः अतीव सरलपद्धतया चित्रमाध्यमेन पी.पी.टी. माध्यमेन छात्राणां सम्भाषणपाठनम् अकुरुताम्। प्रतिदिनं सायंकाले ०४ तः ०५ वादनं यावत् अस्य वर्गस्य वेबेक्स द्वारा आयोजनम् अभवत्। अस्मिन् वर्गे आहत्य ४० छात्राः सम्भाषणद्वारा संस्कृतं पठितवन्तः।

अस्य वर्गस्य समापनम् २०/०८/२०२० तमे दिनाङ्के सायंकाले ०४ वादने आयोजितम् आसीत्। समापने वर्गे पठितवन्तः छात्राः सरलसंस्कृतेन स्वानुभवकथनम्, कथाकथनम्, परिचयप्रदानम्, दिनचरीकथनम्, इत्यादि प्रस्तुतवन्तः। अस्मिन् अवसरे विश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो.गोपबन्धुमिश्रवर्यः छात्रेभ्यः शुभकामनाप्रदानपूर्वकम् आशीः प्रदत्तवान्। तेन वर्गसञ्चालकयोः कृतेऽपि धन्यवादभावः प्रकटीकृतः। समापनानन्तरम् अपि अस्य वर्गस्य प्रतिदिनम् आयोजनं भवेत् इति कुलपतिमहोदयस्य इच्छा आसीत् तथा वर्गस्य अध्यापकयोः अपि तदर्थम् सज्जता आसीत् अतः २०/०८/२०२० तमे दिनाङ्के समापनं कृत्वा पुनः प्रतिदिनम् अस्य वर्गस्य संचालनम् आयोजनं च डॉ.दीपेशमहोदयेन आरब्धम्। वर्गे मासं यावत् पठिताः छात्राः इतोऽपि स्तरवर्धनाय प्रतिदिनं सायंकाले सम्भाषणवर्गे पठन्ति। एवं विश्वविद्यालये नूतनप्रविष्टाः छात्राः सम्भाषणज्ञानपूर्वकं शास्त्रम् प्रति गच्छेयुः तदर्थम् अयं प्रकल्पः सुन्दररीत्या आयोज्यमानः अस्ति।















## नटराजवन्दना





श्रीसोमनाथसंस्कृतविश्वविद्यालयेन श्रीगोविन्दगुरुविश्वविद्यालयेन च संयुक्तोपक्रमेण अस्मिन् पवित्रे श्रावणमासे भगवतः शिवस्य आराधनां कर्त्तुं नटराजवन्दना इति कार्यक्रमः आयोजितः। प्रत्येकं सोमवासरे शिवस्य महिमानं वर्णयत् व्याख्यानम् आयोज्यते स्म। अस्याः वन्दनायाः आरम्भः २७/०७/२०२० तमे दिनाङ्के सञ्जातः। प्रथमे व्याख्याने श्रीयोमनाथसंस्कृतविश्वविद्यालयस्य माननीयस्य कुलपतेः प्रो. गोपबन्धुमिश्रमहोदयस्य तथा श्रीगोविन्दगुरुविश्व-विद्यालयस्य माननीयस्य कुलपतेः प्रो. प्रतापसिंह चौहाण महोदयस्य प्रेरणया डॉ. कृणालभाई जोषी "शिवपुराणे विन्ध्येश्वरसंहितायाः माहात्म्यम्" इति विषयमवलम्ब्य अभाषत।

अस्याः वन्दनायाः द्वितीयं व्याख्यानम् ०३/०८/२०२० तमे दिनाङ्के आयोजितम्। अस्मिन् व्याख्याने डॉ. पङ्कजकुमारः रावलः "शिवपुराणे नवधाभक्तिः" इति विषयमधिकृत्य अभाषत। तृतीयं व्याख्यानम् १०/०८/२०२० तमे दिनाङ्के आयोजितम्। अत्र श्रीसोमनाथसंस्कृतविश्व-विद्यालय-सञ्चालित-महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या महाभागः "शिवपुराणे अष्टाङ्गयोगः" इत्यस्मिन् विषये व्याख्यानम् अकरोत्। चतुर्थम् अन्तिमं च व्याख्यानम् १७/०८/२०२० तमे दिनाङ्के भागवतकथाकारस्य डॉ. महादेवप्रसाद महेता महोदयस्य आसीत्। तेन अस्मिन् व्याख्याने "शिवपुराणे उमामहेश्वरसंवादः" इति विषये समभाष्यत। एवं श्रावणमासस्य प्रत्येकं सोमवासरे अयं विशिष्टः उपक्रमः आचरितः। एतस्य सम्पूर्णकार्यक्रमस्य ओनलाइन माध्यमेन आयोजनम् अभवत्।

## अतिथिभवनस्य भूमिपूजनम्



श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य परिसरे अनेकानि आधुनिकानि भवनानि निर्माणाधीनानि वर्तन्ते। अस्मिन् एव प्रवाहे विश्वविद्यालयस्य परिसरे "श्रीः" अतिथिभवनस्य भूमिपूजनम् २१/०७/२०२० तमे दिनाङ्के माननीयकुलपतिवर्यस्य प्रो. गोपबन्धुमिश्रमहोदयस्य वरदहस्तेन अभवत्। अतिथिभवनम् "श्रीः" इत्यभिधमस्ति अतः तस्य निर्माणेन विश्वविद्यालयस्य श्रीः इतोऽपि वर्धिष्यते। एतस्मिन् भूमिपूजने विश्वविद्यालयस्य सारथिभूतः कुलसचिवः डॉ. दशरथः जादवमहोदयः उपस्थितः आसीत्। तेन च कुलपतिना सह भूमिपूजनं व्यधायि। पुराणविभागस्य अध्यापकः डॉ. पङ्कजरावलमहोदयः भूमिपूजनम् अकारयत् तथा ग्रन्थालयलिपिकः श्रीमान् विशालभाई जोषी सहायताम् अकरोत्। सम्प्रति अस्य भवनस्य निर्माणं जायमानम् अस्ति।




# संस्कृतसप्ताहोत्सवः


प्रतिवर्षमिव अस्मिन् वर्षे अपि श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहमहोत्सवस्य आयोजनम् ३१ तः ०६/०७/२०२० तमेषु दिनाङ्केषु जातम्। अस्य सप्ताहोत्सवस्य उद्घाटनसत्रं ३१/०७/२०२० तमे दिनाङ्के शुक्रवासरे प्रातः सार्धदशवादने अभवत्। उद्घाटनसत्रे प्रास्ताविककथनं महानुभावानां स्वागतं च प्राचार्यः नरेन्द्रकुमारः पण्ड्यामहोदयः अकरोत्। ततश्च क्रमेण श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भाष्यपरम्परा ज्ञानप्रवाहश्च, २. काश्मीरशाक्तदर्शनम् एवञ्च भवानीसहस्रनामनिरूपणम् इति पुस्तकद्वयस्य लोकार्पणं महानुभावानां करकमलैः जातम्।




संस्कृतसप्ताहोत्सवस्य उद्घाटनकार्यक्रमः



संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रे पुस्तकविमोचनम्




संस्कृतसप्ताहोत्सवस्य उद्घाटनसत्रस्य Live प्रसारणम्

अस्मिन् उद्घाटनसत्रे मुख्यवक्तृरूपेण सौभाग्येन प्राप्तः संस्कृत-संवर्धन-प्रतिष्ठानस्य न्यासी पद्मश्रीः चमूकृष्णशास्त्रिवर्यः। मान्यः शास्त्रिवर्यः संस्कृत-प्रसाराय व्रती वर्तते इति विज्ञातप्रायम्। तस्य भाषणमपि सर्वथा प्रासङ्गिकम् अनुकरणीयं च भवति इत्यपि प्रसिद्धमेव। इत्थमस्मिन् अवसरेऽपि श्रीमान् शास्त्रिवर्यः संस्कृतसेवायै नूतनान् उपायान् प्रदर्शितवान्। संस्कृतशिक्षकाः कथं संस्कृतं प्रसारयितुं शक्ताः इति विषयेऽपि विविधान् उपायान् सः अवदत्। आधुनिकः कालः तकनीकिकालः, यन्त्रकालः वर्तते, विविधानां यन्त्राणां तकनीकीनां च उपयोगेन संस्कृतकार्यं कथं भवितुं शक्नोति इति शास्त्रिमहोदयेन अवादि।

कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय संस्कृतसप्ताहस्य, वर्तमानसमये संस्कृतस्य च महत्त्वम् अवदत्। कार्यक्रमस्य अन्ते कुलसचिवः डॉ दशरथ जादवः सर्वेषां कृते धन्यवादनवचांसि प्रकटितवान्।

अस्य उद्घाटनकार्यक्रमस्य संचालनं साहित्यविभागस्य सहायकाचार्येण श्रीजिगरभट्टमहोदयेन अक्रियत। एतस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्नमहाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, छात्राः च ऑनलाइन वेबेक्स माध्यमेन भागं गृहीतवन्तः। एतस्य उद्घाटनकार्यक्रमस्य फेसबुक माध्यमेन लाइव प्रसारणमपि जातम्। तत्रापि प्रायः सप्तशतं जनाः अमुं कार्यक्रमं दृष्ट्वा लाभान्विताः समभवन्।

अस्मिन् सप्ताहोत्सवे विविधाः स्पर्धाः कार्यक्रमाः च आयोजिताः आसन्। स्पर्धानाम् आयोजनं विश्वविद्यालयस्य अध्यापकैः कृतमासीत्। संस्कृतप्रचाराभियानम् अपि अस्मिन् सप्ताहे आयोजितम्। प्रचाराभियानस्य अङ्गतया विडियो अभियानम् तथा सूक्ति-अभियानम् आचरितम्। रक्षाबन्धनस्य दिवसः संस्कृतदिवसः अस्ति अतः तस्मिन् दिने ३.८.२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा विडिओ अभियानस्य अङ्गतया महानुभावैः, संस्कृतमहाविद्यालयप्राध्यापकैः, विश्वविद्यालयकर्मचारिभिः, पूर्वच्छात्रैः, संस्कृतानुरागिभिः च लघु-चलच्चित्राणि निर्मितानि आसन् तेषां सोशिअल मिडिया माध्यमेन प्रचारः कृतः। आहत्य १४० जनाः तादृशाणि चलच्चित्राणि प्रेषितवन्तः। तेषु गुजरातराज्यस्य माननीयः शिक्षणमन्त्री, स्वामि-श्रुतिप्रकाशदासः, प्रो. चेतन त्रिवेदी, प्रो. नितिन पेथाणी इत्यादयः महानुभावाः अपि आसन्। विश्वविद्यालयस्य प्रायः सर्वेऽपि कर्माचारिणः स्वस्य, स्वकुटुम्बस्य, स्वबान्धवानां च चलच्चित्राणि प्रेषितवन्तः। एतेषां चलच्चित्राणां सम्पादनं कृत्वा तत्र विश्वविद्यालयस्य लोगो समारोप्य एतानि तेभ्यः प्रत्यर्पितानि। सर्वैः अपि सामाजिकमाध्यमैः तानि प्रसारितानि। विश्वविद्यालयस्य फेस-बुक-पृष्ठ-द्वारा एतेषु उपषष्टिः चलच्चित्राणि प्रसारितानि। फेसबुकद्वारा अस्मद्विश्वविद्यालयद्वारा जायमानम् एतद् अभियानं वीक्ष्य अन्येऽपि नैके संस्कृतानुरागिणः प्रेरिताः। तैः अपि एतादृशाः यत्नाः अनुष्ठिताः। एतेन प्रकारेण अन्यूनं २५००० जनान् प्रति संस्कृत-दिनस्य सन्देशः गतः। विडिओ-अभियानस्य संयोजनम् डॉ.दीपेशः कतिरा अकरोत्।

प्रचाराभियानस्य अङ्गतया एव संस्कृतसूक्ति-अभियानम् अभवत्। सूक्त्यभियाने फेसबुक एवं ट्वीटरमाध्यमेन संस्कृतसाहित्यस्य प्रसिद्धसूक्तिषु प्रतिदिनम् १० सूक्तीनां प्रचारः जातः। सूक्ति-अभियानस्य संकलनं श्रीजिगरभट्टः अकरोत्।


आसप्ताहं वर्तमानसमये संस्कृतस्य का प्रासङ्गिकता इति विषयमादाय वृत्तपत्रेषु प्रासङ्गिकानां संस्कृत-विषयक- विभिन्नानां सप्तलेखानां प्रकाशनं जातम्। एते लेखाः कुलपति-प्राचार्य-अध्यक्षादिभिः लिखिताः आसन्। वृत्तपत्रेषु प्रकाशनाय डॉ.आशा माढक तथा कु.अपूर्वा अग्रवाल संयोजनम् अकुरुताम्। एवं त्रिविधं प्रचाराभियानम् अभवत्।

संस्कृतसप्ताहे प्रतिदिनं विविधाः स्पर्धाः अपि आयोजिताः आसन्। एतासाम् आयोजनं स्तरद्वये कृतम् आसीत् – विद्यालयस्तरे महाविद्यालयस्तरे च। तद्विवरणम् एवम् अस्ति -

| दिनाङ्कः | स्पर्धा | भागग्राहिणां सङ्ख्या |
|---|---|---|
| ०१/०८/२०२० | कथाकथनस्पर्धा | १४ |
| ३१/०७/२०२० | स्तोत्रकण्ठपाठस्पर्धा | ३४ |
| ०४/०८/२०२० | एककसंस्कृतगीतस्पर्धा | २३ |
| ०५/०८/२०२० | वक्तृत्वस्पर्धा | १८ |
| ३१ तः ०६/०८/२०२० | ओनलाइन प्रश्नोत्तरी | २०० |


एवम् आसप्ताहं विविधकार्यक्रमाः श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा संस्कृतसप्ताहावसरे आचरिताः। एतस्य ऑनलाईन-संस्कृतसप्ताहोत्सवस्य समापनकार्यक्रमः ०६/०८/२०२० तमे दिनाङ्के गुरुवासरे प्रातः सार्धदशवादने समायोजितः। कार्यक्रमस्य आरम्भः मङ्गलाचरणेन कुलगीतेन च अभवत्। अस्मिन्नवसरे अनुस्नातकविभागस्य अध्यक्षः डॉ॰ ललितपटेलमहाभागः महानुभावानां परिचयं प्रदाय स्वागतम् अकरोत्। तदनु डॉ॰ दीपेशकतिरामहोदयः संस्कृतसप्ताहस्य वृत्तकथनमकरोत्।




कार्यक्रमे अस्मिन् मुख्यातिथिरूपेण श्रीगोविंदगुरुविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. प्रतापसिंहचौहाणमहोदयः अस्माभिः सद्भाग्येन सम्प्राप्तः। सन्दर्भे अस्मिन् तेन प्रसङ्गोचितम् उद्बोधनमपि कृतमासीत्। तत्र समापनकार्यक्रमे विश्वविद्यालयस्य माननीयः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय कार्यक्रमस्य सफलतायै सर्वेभ्यः आयोजकेभ्यः आशीर्वचांसि प्रादात्। अस्मिन् समपनावसरे श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा प्रकाशितस्य १. भारतीयदर्शनसिद्धान्तप्रभा, २. संस्कृतवाङ्मये नगररचना, ३. वाक्यार्थज्योतिः इति ग्रन्थत्रयस्य लोकार्पणं महानुभावानां करकमलैः जातम्। नूतनग्रन्थानां परिचयः कु॰ अपूर्वा अग्रवालमहोदयया प्रादीयत। डॉ॰ आशा माढकमहाभागया विभिन्नस्पर्धानां विजेतॄणां नामोद्घोषणमकारि। अन्ते कार्यक्रमस्य समापने प्राचार्यः डॉ. नरेंद्रकुमार पण्ड्या महोदयः सर्वेषां कृते धन्यवादनवचांसि प्रकटितवान्। सम्पूर्णकार्यक्रमस्य संचालनं ज्योतिषविभागस्य सहायकाचार्यः श्रीनित्यानन्दओझामहोदयः अकरोत्। कार्यक्रमस्य समापनं पूर्णतामन्त्रेण अभवत्।

ऑनलाईन वेबेक्स माध्यमेन समायोजिते समापनकार्यक्रमेऽस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य एवं विश्वविद्यालयसंलग्न महाविद्यालयानां प्राचार्याः, प्राध्यापकाः, कर्मचारिणः, अधिकारिणः, मुख्यातिथिमहोदयाः तथा च सर्वासु स्पर्धासु विजेतारः छात्राः उपस्थिताः आसन्। कार्यक्रमस्यास्य फेसबुक माध्यमेन लाईव प्रसारणमपि जातम्। तत्रापि बहवः जनाः कार्यक्रममम् दृष्ट्वन्तः। सम्पूर्णकार्यक्रमस्य विवरणं वृत्तं च दैनिकसमाचारपत्रैः – दैनिकसमाचार, गुजरातसमाचार, फुलछाब इत्यादिभिः प्रकाशितम् आसीत्। एवम् अयम् अद्भुतः संस्कृतसप्ताहोत्सवः विश्वविद्यालयेन समायोजि। सम्पूर्ण-सप्ताहोत्सवस्य संयोजकाः डॉ. दीपेशः कतिरा, डॉ.आशा माढकः, श्रीजिगरभट्टः, श्रीविपुलः जादवः, श्रीनित्यानन्दः ओझा, कु. अपूर्वा अग्रवालः च आसन्।



# रामायण एवं व्यक्तित्व विकास तथा रघुवंशम् इति अल्पकालीना प्रमाणपत्रीय-योजना




शोर्ट-टर्म-योजनाद्वयस्य उद्घाटनम्







श्रीसोमनाथसंस्कृतविश्वविद्यालयेन वर्तमानपरिस्थितिम् अनुलक्ष्य सामाजिकान् जनान् च उद्दिश्य काचित् अन्तर्जालीया अल्पकालीना प्रमाणपत्रीय-योजना आरब्धा वर्तते। "रामायण एवं व्यक्तित्व विकास" तथा "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" विषयौ अधिकृत्य आयोजितायाः अस्याः योजनायाः उद्घाटनं ०३.०८.२०२० दिनाङ्के सायं पञ्चवादने अन्तर्जालमाध्यमेन जातम्। अस्मिन् उद्घाटनसत्रे मुख्यातिथिरूपेण गुजरात टेक्नोलॉजिकल विश्वविद्यालयस्य कुलपतिः प्रो. नवीन शेठः उपस्थितः आसीत्। कार्यक्रमस्य आरम्भे मुख्यसंयोजकेन प्रो. महेन्द्रकुमार दवे वर्येण अन्तर्जालमाध्यमेन उपस्थितानां महानुभावानां स्वागतं विधाय अस्य कार्यक्रमस्य प्रास्ताविकं प्रास्तावि। तदनु मुख्यातिथेः प्रो. नवीन शेठ वर्यस्य उद्बोधनं जातं यत्र महोदयेन विश्वविद्यालयद्वारा आरब्धस्य एतस्य उपक्रमस्य भूरिशः प्रशंसा कृता। अस्मिन् कार्यक्रमे अध्यक्षरूपेण वदता प्रो. गोपबन्धु मिश्र वर्येण उक्तं यत् सम्प्रति संस्कृतविश्वविद्यालयेषु शास्त्राध्ययनेन साकं सामाजिकावश्यकताम् उद्दिश्य अपि कतिपयाः पाठ्यक्रमाः सञ्चाल्यमानाः सन्ति। तस्मिन् प्रसङ्गे अस्माकं विश्वविद्यालयेन "रामायण एवं व्यक्तित्व विकास" तथा "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" इति अन्तर्जालीया अल्पकालीना प्रमाणपत्रीय-योजना आरब्धा वर्तते, यया च नूनं सामाजिकाः जनाः लाभान्विताः भविष्यन्ति। कार्यक्रमस्य अन्ते कुलसचिवः डॉ. दशरथ जादवः धन्यवादज्ञापनम् अकरोत्। अस्य उद्घाटनकार्यक्रमस्य समग्रं सञ्चालनं दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः अकरोत्।

"रामायण एवं व्यक्तित्व विकास" इति अन्तर्जालीयायाम् अल्पकालीन-प्रमाणपत्रीय-योजनायां प्रतिसप्ताहं सोमवासरे, मङ्गलवासरे, बुधवासरे च सायं षड्वादनतः सप्तवादनं यावत् रामायणे कृतभूरिपरिश्रमाणां विदुषां विभिन्नविषयेषु उत्तमानि व्याख्यानानि भवन्ति। अस्याः योजनायाः सम्पूर्तिः २१.१०.२०२० दिनाङ्के भविता। "रामायण एवं व्यक्तित्व विकास" इति अन्तर्जालीय-अल्पकालीन-प्रमाणपत्रीय-योजनायाः संयोजनं डॉ. जानकीशरण आचार्यः कुर्वन् अस्ति।

प्रति-गुरु-शुक्र-शनिवासरम् सायम् ६ तः ७ वादनं यावत् "रघुवंशम् (द्वितीयसर्गः) कथं पठेम" इत्यस्याः योजनायाः अङ्गतया कुशलैः अध्यापकैः अध्यापनं क्रियते। प्रतिसप्ताहम् निरन्तरम् एतदन्तर्गतं व्याख्यानानि भवन्ति। अस्यां योजनायां प्रश्नपत्रद्वयम् अस्ति, प्रथमे प्रश्नपत्रे रघुवंशस्य द्वितीयसर्गस्य ०१ तः ३० श्लोकाः तथा द्वितीये प्रश्नपत्रे ३१ तः ७५ श्लोकाः सन्ति। प्रथमप्रश्नपत्रस्य अध्यापनम् अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेल-महोदयः ०१ तः १५ श्लोकपर्यन्तम्, तथा प्राचार्यः डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयः १६ तः ३० श्लोकपर्यन्तम् अकुरुताम्। अध्यापनस्य पद्धतिः अतीव रुचिप्रदा अस्ति। अत्र एकैकं पद्यम् अतीव व्यवस्थितपद्धत्या पाठ्यते। पद्यम्, पद्यस्य पदच्छेदः, आकाङ्क्षा, अन्वयः, तिसृषु भाषासु पदार्थः भावार्थः च, व्याकरणं समासः सन्धिः कृदन्तः तद्धितम्, छन्दः, अलङ्कारः तथा प्रयुक्तस्य क्रियापदस्य धातुरूपाणि, एवं क्रमेण प्रत्येकं पद्यस्य पाठनम् अस्यां योजनायां भवति। द्वयोः सप्ताहयोः एकवारं मार्गदर्शनाय विशिष्टं चर्चासत्रम् अपि आयोज्यते। तत्र अध्येतॄणां जिज्ञासाशमनं, शङ्कासमाधानं किञ्च विविधविषयाणां चर्चा भवति।

रघुवंशम् (द्वितीयसर्गः) कथं पठेम इति योजनायाः संयोजकः साहित्यविभागस्य सहायकाचार्यः श्रीजिगरः भट्टः अस्ति। प्रतिव्याख्यानम् ओडिओ-विडिओ रेकोर्डिंग् संयोजकद्वारा भवति। अद्यावधि जातानि सर्वाणि व्याख्यानानि उपलब्धानि सन्ति। एवम्, विश्वविद्यालयस्य अयं विशिष्टः प्रकल्पः सफलतापूर्वकम् आयोज्यमानः अस्ति।

# श्री के. का. शास्त्रि-पाक्षिकव्याख्यानमाला




श्रीसोमनाथसंस्कृतविश्वविद्यालयः कोरोनाकाले विविधान् कार्यक्रमान् ओनलाइनमाध्यमेन आयोजयन् वर्तते। एतेषु कार्यक्रमेषु कश्चन् विशिष्टः कार्यक्रमः अस्ति श्री के.का.शास्त्रि-पाक्षिक-व्याख्यानमाला। एतस्याः व्याख्यानमालायाः उद्घाटनम् ०८/०८/२०२० तमे दिनाङ्के माननीयस्य कुलपतेः प्रो. गोपबन्धुमिश्रवर्यस्य अध्यक्षतायां सम्पन्नम्। उद्घाटनसत्रे विशिष्टातिथिरूपेण "युनाइटेड् नेशन एसोसिएसन" इत्यस्य अध्यक्षः श्रीमान् भरतभाई पण्ड्या उपस्थितः आसीत्। भारतसर्वकारस्य निर्वाचनायुक्तचरः श्रीमान् एन. गोपालस्वामी महोदयः मुख्यातिथिरूपेण उपस्थितः आसीत्। मुख्यवक्तृरूपेण इन्दीरागान्धि-राष्ट्रिय-कलाकेन्द्रस्य सदस्यसचिवः डॉ. सच्चिदानन्दः जोषी महाभागः उपस्थाय "भारतीय संस्कृति में संवादधर्म" इति विषये सारपूर्णं व्याख्यानम् अकरोत्। उद्घाटनसत्रस्य अध्यक्षः मान्यः कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्षीयप्रवचनम् अकरोत्। धन्यवादज्ञापनेन पूर्णतामन्त्रेण च प्रथमं व्याख्यानम् उद्घाटनसत्रं च समाप्तिमगात्।



के.का.शास्त्रि-व्याख्यानमालायां भाषमाणः
श्री एन. गोपालस्वामी महोदयः

एतस्यामेव व्याख्यानमालायां द्वितीयं व्याख्यानम् २१/०८/२०२० तमे दिनाङ्के सायं ०५ वादने आयोजितम्। अत्र मुख्यवक्तृरूपेण गुजरातसाहित्याकादम्याः अध्यक्षः डॉ. विष्णुपण्ड्यामहोदयः उपस्थाय "आधुनिक परिप्रेक्ष्य में संस्कृत" इति विषये व्याख्यानम् अकरोत्। ०५/०९/२०२० तमे दिनाङ्के आयोजिते तृतीयव्याख्याने गुजरातविश्वविद्यालयस्य कुलपतिचरः प्रो.नरेश-वेद-महोदयः "उपनिषत् अमृत के आम्रवृक्ष" इति विषये व्याख्यानम् अकरोत्। १४/१०/२०२० तमे दिनाङ्के आयोजिते चतुर्थे व्याख्याने परमपूज्यः भद्रेशदासस्वामी "श्रीमद्भगवद्गीता में स्थितप्रज्ञता" इति विषये व्याख्यानम् अकरोत्। ०४/१२/२०२० तमे दिनाङ्के आयोजिते पञ्चमे व्याख्याने प्रो. मिथिलाप्रसाद-त्रिपाठिवर्यः "श्रीमद्भागवत पुराण में लोकचिन्तन" इतिविषये व्याख्यानम् अकरोत्। १७/१२/२०२० तमे दिनाङ्के आयोजिते षष्ठे व्याख्याने हरिसिंह गौर विश्वविद्यालयस्य माननीयः कुलाधिपतिः प्रो. बलवन्तः जानी महोदयः "श्रीके.का.शास्त्रिणः संशोधनकार्यम्" इति विषये व्याख्यानम् अकरोत्।

सर्वेषां व्याख्यानानाम् आयोजनम् निरन्तरं नित्यतया भवति। प्रतिव्याख्यानम् ओनलाइन फेसबूक उपरि जीवन्तप्रसारणेन प्रसारितं भवति अतः सामाजिकाः अपि अस्याः व्याख्यानमालायाः लाभं लभन्ते। अस्याः व्याख्यानमालायाः आयोजकरूपेण अनुस्मातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः तथा महाविद्यालयस्य प्राचार्य डॉ. नरेन्द्रकुमारः पण्ड्या वर्तेते। संयोजकरूपेण डॉ. शत्रुघ्नपाणिग्राही श्रीविपुलः जादवः च वर्तेते। एवम् अस्याः व्याख्यानमालायाः आयोजनं जायमानम् अस्ति।



के.का.शास्त्रि-व्याख्यानमालायां भाषमाणः
प्रो. मिथिलाप्रसाद-त्रिपाठिवर्यः




के.का.शास्त्रि-व्याख्यानमालायां भाषमाणाः
भद्रेशस्वामिनः

## विश्वसिंहदिवसः

२०२० वर्षस्य अगस्तमासस्य १०मे दिनाङ्के श्रीसोमनाथ-संस्कृत-विश्वविद्यालये विश्वसिंहदिवसस्य आयोजनमभवत्। अस्य कार्यक्रमस्य आरम्भे महानुभावानां स्वागतं अनुस्नातकविभागाध्यक्षः डॉ.ललितपटेलमहोदयः कृतवान्। सिंहानां संरक्षणाय एकं व्याख्यानमभवत् तत्र प्रो. संजयभाई भूत महोदयेन तथा श्रीनवलभाई भावसार महोदयेन सिंहानां संरक्षणाय अनेके उपायाः सूचिताः। कार्यक्रमे माननीयः कुलपतिः प्रो. गोपवन्धुमिश्रवर्यः अध्यक्षत्वेन उद्बोधनम् अकरोत्। कार्यक्रमस्य संयोजनं डॉ.रमेशचन्द्रः शुक्लः श्रीनित्यानन्द-ओझा च कृतवान्। उपस्थितानां धन्यवादज्ञापनं डॉ. शुक्लमहोदयः कृतवान् तथा सञ्चालनं श्रीनित्यानन्दः ओझा कृतवान्।




विश्वसिंहदिवसम् उपलक्ष्य आयोजितं व्याख्यानम्




विश्वसिंहदिवसे भाषमाणः श्रीनवलभाई भावसारः तथा श्रीसंजयभाई भूतः

## राष्ट्रियसेवायोजनादिवसः

२४/०९/२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृत विश्वविद्यालये राष्ट्रिय-सेवा-योजना-दिवसम् उपलक्ष्य वृक्षारोपणं तथा विशिष्टं व्याख्यानम् आयोजितम्। डॉ. जयेशकुमारः मुंगरा महोदयः छात्रान् उद्बोधितवान् तथा राष्ट्रसेवायै राष्ट्रियसेवायोजनायाः महत्त्वम् अपि सः उक्तवान्। अस्मिन् कार्यक्रमे विश्वविद्यालयसञ्चालित संस्कृत महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या महोदयः अध्यक्षत्वेन उपस्थाय मार्गदर्शनम् अकरोत्। विश्वविद्यालयपरिसरे अध्यापकैः वृक्षारोपणम् अपि कृतम्। कोरोनाकाले यत्र कुत्रापि वयं भवामः किन्तु वृक्षारोपणम् अवश्यम् एव करणीयं तथा वृक्षाणा पालनम् अस्माकं कर्तव्यम् अस्ति इति अस्मिन् कार्यक्रमे आयोजकैः सन्दिष्टम्। अन्ते धन्यवादज्ञापनेन पूर्णतामन्त्रेण च अयं कार्यक्रमः पूर्णः अभवत्।




## स्वातन्त्र्यदिवसः

प्रतिवर्षमिव अस्मिन् वर्षेऽपि श्रीसोमनाथसंस्कृतविश्वविद्यालये १५ अगस्त २०२० तमे दिनाङ्के भारतस्य ७४तमः स्वतन्त्रतादिवसः आचरितः। विश्वविद्यालयस्य मान्यः कुलपतिः प्रो.गोपबन्धुमिश्रः ध्वजोत्तोलनम् अकरोत्। ततश्च सर्वैः अध्यापकैः कर्मचारिभिश्च ध्वजवन्दम् अक्रियत। अस्मिन् वर्षे कोरोनासङ्क्रमणकारणेन सर्वे विश्वविद्यालयस्य अध्यापकाः कर्मचारिणश्च शारीरिकरूपेण अन्तरं परिपाल्य परिसरे ध्वजवन्दनाय उपस्तिथाः आसन्। अस्मिन् प्रसङ्गे माननीयः कुलपतिवर्यः स्वकीये उद्बोधने अवदत् यत् सम्प्रति सम्पूर्णं विश्वं कोरोना सह युद्धं कुर्वत् वर्तते। सर्वत्र असामान्या स्थितिः अस्ति। सत्यपि कष्टे भारतम्, तेन सह अस्माकं विश्वविद्यालयोऽपि प्रगतिं कुर्यात् इति कुलपतिना अवादि। प्रतिवर्षं विविधकार्यक्रमाः भवन्ति एव किन्तु अस्मिन् वर्षे कोरोना कारणेन ध्वजवन्दनं विधाय कुलपतिवाचं च निशम्य कार्यक्रमः पूर्णः कृतः। अस्य कार्यक्रमस्य संयाजनं डॉ. जयेशकुमारः मुंगरा महोदयः अकरोत्।










# नवीना राष्ट्रिया शिक्षानीतिः संस्कृतं च




१८/०८/२०२० तमे दिनाङ्के श्री-सोमनाथ-संस्कृत-विश्वविद्यालयेन आयोजिते "नवीना राष्ट्रिया शिक्षानीतिः संस्कृतं च" इति विषये विशेषज्ञरूपेण 'पद्मश्री' सम्मानितः 'संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली' इत्यस्य न्यासी सचिवः श्री चमू कृष्णशास्त्री आसीत्। कार्यक्रमस्य अध्यक्षः अस्य विश्वविद्यालयस्य कुलपतिः प्रो. गोपबन्धु मिश्रः आसीत्। विशेषज्ञरूपेण वदन् श्री चमू कृष्णशास्त्री महोदयः नवीनायाः राष्ट्रिय-शिक्षानीतेः अनुसारं संस्कृत-विश्वविद्यालयेन विशेषतः श्री-सोमनाथ-संस्कृत-विश्वविद्यालयेन किं किं साधनीयम् इति उक्तवान्। सहैव विविधप्रश्नानाम् उत्तरं कृतवान्। अत्र संयोजकरूपेण डॉ. ललित पटेलः डॉ. नरेन्द्र कुमार पण्ड्या च आस्ताम्। अत्र अध्यक्षस्य अध्यक्षीयभाषणानन्तरं डॉ. दशरथ जादव-महोदयेन आभारप्रदर्शनं विहितम्। अत्र कार्यक्रमे चतुःपञ्चाशशत् जनाः श्रोतृरूपेण आसन्। कार्यक्रमेऽस्मिन् प्रो. विनोद कुमार झा संयोजकत्वेन कार्यसम्पादनम् अनुष्ठितम्।

# माइक्रोसोफ्ट टीम्स् तन्त्रांशस्य प्रशिक्षणकार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये कार्यरतानाम् अध्यापकानां कृते २५.०८.२०२० दिनाङ्के अपराह्णे ०३.०० वादनात् ६.०० वादनं यावत् माइक्रोसोफ्ट टीम्स् (Microsoft Teams) इति तन्त्रांशस्य प्रशिक्षणाय कश्चन कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः भागम् अगृह्णन्। कोविड्-१९ सङ्क्रमणकारणेन छात्राणां साक्षादुपस्थित्यभावात् तेषाम् अध्ययनम् अन्तर्जालमाध्यमेन भवतु एतदर्थम् एषः प्रशिक्षणः कार्यक्रमः समायोजितः आसीत्।

अस्य माइक्रोसोफ्ट टीम्स् तन्त्रांशस्य प्रशिक्षणकार्यक्रमस्य आध्यक्षं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः अकुर्वन्। अस्य कार्यक्रमस्य आरम्भः मङ्गलाचरणेन जातः। कार्यक्रमस्य संयोजकेन दर्शनविभागस्य प्राध्यापकेन डॉ. जानकीशरण आचार्येण मञ्चस्थमहानुभावानां स्वागतं विधायं कार्यक्रमस्य प्रास्ताविकं प्रास्ताविः। तदनु अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमार पटेलः अपि प्रसङ्गोचितं वक्तव्यं प्रादात्। अस्मिन्नवसरे वेरावलस्थ-महिला-महाविद्यालयस्य सहाचार्येण डॉ. सञ्जय भूत वर्येण एतस्य माइक्रोसोफ्ट टीम्स् इति तन्त्रांशस्य विशिष्टं प्रशिक्षणम् अपि उपस्थितेभ्यः सर्वेभ्यः प्रदत्तम्।

अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः अध्यक्षीयम् उद्बोधनं कृतवन्तः। तैः उक्तं यत् कोविड-१९ सङ्क्रमणकारणात् छात्राणां प्रत्यक्षरीत्या तु पाठनं कर्तुं न शक्यते, तथापि अस्माकं विश्वविद्यालयेन जूनमासादारभ्य एव जूम, वेबेक्स इत्यादि तन्त्रांशमाध्यमेन छात्राणाम् कृते अध्यापनम् आरब्धम् आसीत्। सम्प्रति सर्वकारस्य आदेशानुसारं नूतनेन तन्त्रांशमाध्यमेन अपि अध्ययनं सततं भविष्यति, अतः एतदर्थम् अस्माकम् अध्यापकाः सिद्धाः सन्ति। एतस्य तन्त्रांशस्य प्रशिक्षणेन इतोऽपि अध्यापनपद्धतौ नैपुण्यं सम्पाद्यते। कार्यक्रमान्ते संस्कृतमहाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार पण्ड्या धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य संयोजनं च डॉ. जानकीशरण आचार्यः अकार्षीत्।



## शिक्षकदिवसः

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ०५.१०.२०२० तमे दिनाङ्के डॉ. सर्वपल्लि राधाकृष्णन् महोदयस्य जन्मदिवसं शिक्षकदिवसं च उपलक्ष्य निबन्धलेखनस्पर्धा आयोजिता। अस्यां स्पर्धायाम् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य, विविधमहाविद्यालयानां च ८ छात्राः भागमगृह्णन्। सर्वेषामपि निबन्धाः उत्तमाः आसन्। अस्यां स्पर्धायाम् एते छात्राः क्रमेण स्थानं प्राप्तवन्तः। तेषां नामानि यथा-

१. प्रकाशः जानी (प्रथमः), BAPS स्वामिनारायण-संस्कृत-महाविद्यालयः, सारङ्गपुरम्।

२. रविकुमारः रादडिया (द्वितीयः), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्।


३. मृदुल (तृतीया),कालिकट् आदर्श संस्कृत विद्यापीठम्, केरला।

अस्यां स्पर्धायां निर्णायिकारूपेण कु. विदुषी बोल्ला आसीत् तथा स्पर्धायाः संयोजनम् डॉ. उमामहेश्वरी महोदया अकरोत्।

## गान्धीजयन्ती

०२/१०/२०२० तमे दिनाङ्के महात्मनः मोहनदास क. गान्धीवर्यस्य जन्मदिनमुपलक्ष्य श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ओनलाइन प्रश्नोत्तर्याः आयोजनं कृतमासीत्। अस्याः प्रश्नोत्तर्याः आयोजनम् अनुस्नातकविभागस्य अध्यक्षस्य डॉ. ललितकुमार पटेल महोदयस्य तथा महाविद्यालयस्य प्राचार्यस्य डॉ. नरेन्द्रकुमार पण्ड्या महोदयस्य मार्गदर्शनेन सहायकाचार्यः श्रीविपुलः जादवः महोदयः अकरोत्। एषा प्रश्नोत्तरी ३१/०९/२०२० तः ०२/१०/२०२० यावत् उद्घाटिता आसीत्, एतेषु दिवसेषु अस्याम् ओनलाइन प्रश्नोत्तर्याम् आहत्य ४८५ प्रतिभागिनः भागं गृहीतवन्तः। सर्वेभ्यः प्रतिभागिभ्यः ई-प्रमाणपत्रम् अपि प्रदत्तम्।

अस्यैव अङ्गतया ०१/१०/२०२० तमे दिनाङ्के सायं ०५ वादने विश्वविद्यालयस्य परिसरे माननीयस्य कुलपतिवर्यस्य प्रो. गोपबन्धुमिश्रमहोदयस्य मार्गदर्शनेन सर्वैः अध्यापकैः कर्मचारिभिश्च वृक्षारोपणम् अक्रियत। अस्य संयोजनं व्यवस्थापनं च डॉ. जयेशः मुंगरा महोदयः अकरोत्।




## प्रचाराभियानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः नूतनसत्रस्य आरम्भे विश्वविद्यालयस्य प्रचारं प्रसारं कर्तुं विविधशालासु संस्थासु च गतवन्तः। विश्वविद्यालये शास्त्रि-आचार्ययोः कक्ष्ययोः ते छात्राः कथं प्रवेशं प्राप्तुं शक्नुवन्ति? विश्वविद्यालये प्रवेशं प्राप्य तेषां किं भविष्यत् वर्तते? इत्यादिविषये तेषां मार्गदर्शनम् अध्यापकैः कृतम्। अस्मिन् प्रचाराभियाने विश्वविद्यालयस्य प्रचार-प्रसारसमितिः जूनागढ-मेंदरडा-कोडिनार-केशोद-माळिया आदिषु नगरेषु विविधाः शालाः महाविद्यालयान् च गत्वा तत्रत्यान् छात्रान् उदबोधयत्। डॉ. दीपेशः कतिरा, डॉ. आशा माढकः, श्रीविपुलः जादवः, कु.अपूर्वा अग्रवालः एते मिलित्वा कोडिनार-क्षेत्रे महाविद्यालयेषु प्रचार-प्रसारम् अकुर्वन्। डॉ. जयेशः मुंगरा, श्रीजिगरः भट्टः, कु. अपूर्वा अग्रवालः, कु. दृष्टि बारैया चैते जूनागढ-क्षेत्रे प्रचार-प्रसारम् अकुर्वन्। एतैः तत्रत्यानां छात्राणां विश्वविद्यालये प्रवेशाय मार्गदर्शनम् अकारि। अनेन अस्मिन् सत्रे शास्त्रि-आचार्ययोः छात्राणां सङ्ख्याऽपि वर्धमाना अस्ति।




# Students Startup and Innovation Policy (SSIP) विषये एकः परिचयात्मकः कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालये १९.०९.२०२० दिनाङ्के प्रातः ११.०० वादनात् १.०० वादनं यावत् Students Startup and Innovation Policy (SSIP) विषये एकः परिचयात्मकः कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य प्राध्यापकाः तथा च विश्वविद्यालयसम्बद्धानां महाविद्यालयानां सप्तत्यधिकाः प्रधानाचार्याः प्राध्यापकाः च भागम् अगृह्णन्।


अस्य SSIP परिचयात्मकस्य कार्यक्रमस्य आध्यक्षं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः अकुर्वन्। कार्यक्रमस्य आरम्भः मङ्गलाचरणेन जातः। तदनु व्याकरणविभागस्य प्राध्यापिकया सुश्री-विदुषी बोल्ला-वर्यया उपस्थितमहानुभावानां परिचयपुरस्सरं शाब्दिकं स्वागतं विहितम्। संस्कृतमहाविद्यालयस्य प्राचार्याः डॉ. नरेन्द्रकुमार-पण्ड्या-वर्याः अस्य कार्यक्रमस्य प्रास्ताविकं प्रास्तुवन्।

तदनु श्रीसोमनाथसंस्कृतविश्वविद्यालये SSIP योजनायाः समन्वयकः तथा च दर्शनविभागस्य प्राध्यापकः डॉ. जानकीशरण आचार्यः गुजरातसर्वकारस्य शिक्षाविभागेन आयोजितायाः SSIP योजनायाः विषये व्याख्यानम् अकरोत्। ज्ञानप्राप्तेः लक्ष्यम् अभ्युदयप्राप्तिः निःश्रेयसप्राप्तिः च अस्ति। अतः वर्तमानपरिस्थितौ अस्माभिः तथाविधं चिन्तनं करणीयं भवति येन अस्माकं छात्राः न केवलं ज्ञानार्जनं कुर्युः परं तेन ज्ञानेन नूतनोद्योगनिर्माणे अपि समर्थाः भवेयुः। अतः अस्यां योजनायां छात्राणां कृते उद्योग-सर्जनाय नवोन्मेषणाय च सर्वकारपक्षतः आर्थिकं साहाय्यं प्रदीयते। संस्कृतक्षेत्रे अपि स्टार्ट-अप तथा च नवोन्मेषणाय बहूनि क्षेत्राणि सन्ति यत्र संस्कृतच्छात्रैः अपि उद्योगसृजनं कर्तुं शक्यते इति स्वीयव्याख्याने महोदयः उक्तवान्। व्याख्यानान्ते उपस्थितप्राध्यापकैः सहः प्रश्नोत्तरसंवादः अपि जातः। प्रासङ्गिकम् उद्बोधनं कुर्वता श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवेन डॉ. दशरथ जादव वर्येण उक्तं यत् अस्यां योजनायां न केवलं विश्वविद्यालयसंलग्नानां महाविद्यालयानां छात्राः एवं भागं गृहीतुं शक्नुवन्ति परं इतरमहाविद्यालयानां छात्राः अपि अत्र भागग्रहणं कर्तुं शक्नुवन्ति। सर्वेषां महाविद्यालयानां सहयोगेन विश्वविद्यालयः अस्मिन् उदीयमाननूतनक्षेत्रे विशिष्टं कार्यं करिष्यति।

अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याः प्रो. गोपबन्धुमिश्रवर्याः आध्यक्षीयम् उद्बोधनं कृतवन्तः। संस्कृतक्षेत्रे अपि नूतनया पद्धतया चिन्तनं जायमानम् अस्ति, तदनुगुणं कार्याणि अपि क्रियमाणानि वर्तन्ते। संस्कृतसाहित्ये निहितं ज्ञानराशिं पुरस्कृत्य नागपुरस्था काचित् महिला तादृशं जलसंसाधनविधिनिर्माणं कृतवती इति उदाहरणमपि कुलपतिमहोदयः उक्तवान्। संगणके भाषाविज्ञानम्, संस्कृत-एनिमेशन्, संस्कृते वृष्टिविज्ञानम्, वास्तुशास्त्रम्, विधिशास्त्रम्, भाषा-शिक्षणम्, आयुर्वेदशास्त्रम् इत्यादीनि बहूनि क्षेत्राणि सन्ति यत्र संस्कृतच्छात्रैः स्टार्ट-अप तथा च नवोन्मेषणं कर्तुं शक्यते। कार्यक्रमस्य अन्ते SSIP योजनायाः समन्वयकः तथा च अस्य ओनलाइन कार्यक्रमस्य संयोजकः डॉ. जानकीशरण आचार्यः सर्वान् प्रति धन्यवादज्ञानपम् अकरोत्। अस्य ओनलाइन कार्यक्रमस्य सञ्चालनं व्याकरणप्राध्यापिका सुश्री-विदुषी बोल्ला कृतवती।



# वाक्यार्थपरिषद्




वाक्यार्थपरिषदः उद्घाटनम्

प्रतिवर्षं श्रीसोमनाथसंस्कृतविश्वविद्यालये अध्यापकानां सततम् अध्ययनशीलतायै छात्राणां च शास्त्रार्थकौशल्यविकासाय वाक्यार्थपरिषदः आयोजनं क्रियते। अस्य शैक्षणिकसत्रस्य वाक्यार्थपरिषदः उद्घाटनं प्रथमाधिवेशनं च ०५/१०/२०२० तमे दिनाङ्के सायं ०४ वादने आयोजितम्। अस्य कार्यक्रमस्य आरम्भे गृहपतिः श्रीभाविनः पण्ड्या मङ्गलाचरणम् अकरोत्। ततः परं वाक्यार्थपरिषदः अस्य वर्षस्य संयोजकः डॉ. डी. एम. मोकरीया महोदयः कार्यक्रमस्य प्रास्ताविकं स्वागतप्रवचनं च अकरोत्। अस्य कार्यक्रमस्य आयोजकौ वर्तेते डॉ. ललितकुमारः पटेलः तथा डॉ. नरेन्द्रकुमारः पण्ड्या। क्रमेण एताभ्यां कार्यक्रमस्य अस्य प्रासङ्गिकम् उद्बोधनम् अक्रियत। ततः परं वक्तृरूपेण प्रो. देवेन्द्रनाथपाण्डेयः ''विधिवाक्यानां मनोवैज्ञानिकी भूमिका'' इति विषयमधिकृत्य व्याख्यानम् अकरोत्। अस्य उद्घाटनसत्रस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः आध्यक्षीयप्रवचनेन सह "कृत्यानाम् आयामाः" इति विषये व्याख्यानम् अकरोत्। अन्ते अध्यापिका विदुषी बोल्ला धन्यवादज्ञापनम् अकरोत्। अस्मिन् उद्घाटनसत्रसमन्विते प्रथमाधिवेशने विश्वविद्यालयस्य सर्वेऽपि प्राध्यापकाः उपस्थिताः आसन्।

२०/१०/२०२० तमे दिनाङ्के वाक्यार्थपरिषदः द्वितीयम् अधिवेशनम् आयोजितम्। अस्मिन् सत्रे सर्वादौ श्रीभाविनः पण्ड्या मङ्गलाचरणम् अकरोत्। ततः अध्यापिका विदुषी बोल्ला स्वागतप्रवचनं कृतवती। अस्मिन् द्वितीये अधिवेशने डॉ. पङ्कजः रावलः "सप्तशत्याः विशिष्टम् अध्ययनम्", डॉ. रमेशचन्द्रः शुक्लः "ज्योतिषशास्त्रे मूल्यशिक्षणम्", श्रीभीखाभाई सोलंकी "नरसिंहनी काव्यप्रतिभा" इति विषयेषु व्याख्यानानि प्रस्तुतवन्तः। अध्यक्षरूपेण अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमारः पटेलः "रसगङ्गाधरकाव्यलक्षणविमर्शः" इति विषयमधिकृत्य अभाषत। अन्ते अपूर्वा अग्रवालः धन्यवादज्ञापनम् अकरोत्। एवं वाक्यार्थपरिषदः द्वितीयाधिवेशनं पूर्णतामगात्।

०५/१२/२०२० तमे दिनाङ्के वाक्यार्थपरिषद: तृतीयाधिवेशनं सायं ०५वादनतः समायोजितम्। कार्यक्रमेऽस्मिन् उपस्थितानां महानुभावानां शाब्दिकस्वागतं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदयाकरोत्। सत्रेऽस्मिन् विश्वविद्यालयस्य माननीयः कुलपति: प्रो.गोपबन्धुमिश्रमहोदयस्य विशेषोपस्थितौ साहित्यविभागस्य सहायकाचार्य: डॉ. डी. एम. मोकरियामहोदय:, दर्शनविभागस्य सहायकाचार्या डॉ. उमा महेश्वरी महोदया, सङ्गणकविषयस्य प्राध्यापक: श्री आशीष: धनेशा महोदय: तथा च विश्वविद्यालयद्वारा संचालितमहाविद्यालयस्य प्राचार्य: प्रो. नरेन्द्रकुमार: पण्ड्यावर्यः शोधपत्रमाध्यमेन स्वकीयविचारान् अनुभवान् च प्रकटितवन्त:। कार्यक्रमस्य आध्यक्ष्यमपि माननीयः प्राचार्य: प्रो. नरेन्द्रकुमार: पण्ड्यावर्यः ऊढवान्। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत् । सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत्।

१४/१२/२०२० तमे दिनाङ्के सायङ्काले सार्धचतुर्वादनतः शैक्षणिकसभाखण्डे वाक्यार्थपरिषदः चतुर्थाधिवेशनमायोजितम्। अस्याः सभायाः आध्यक्ष्यं समलङ्कृतवन्तः आसन् – वेदविभागस्य आचार्य्याः प्रो॰ देवेन्द्रनाथपाण्डेयवर्य्याः। सभायामस्यां शोधपत्रत्रयं पठितम्। तत्र प्रथमवक्तृत्वेन व्याकरणविभागस्य सहायकाचार्य्येण डॉ॰ दीपेशविनोदकतिरामहोदयेन 'सरलमानकसंस्कृतालेखस्य समीक्षा' इत्यमुं विषयमादाय संस्कृतभाषां व्यापकतया प्रयोक्तुम्, सरलीकर्त्तुञ्च उपायाः बोधिताः। अनन्तरं द्वितीयशोधपत्रप्रस्तोत्री आसीत् – प्रा॰ मनीषाबेन कालेवर्य्या, अनया उपन्यासस्थनायिकायाः मनोवैज्ञानिकदशायाः प्रतिपादनपुरस्सरं 'सुषमा बेटी के 'लौटना' उपन्यास में नारी अस्मिता की खोज' इति विषयः उपस्थापितः। ततः अन्तिमवक्ता आसीत् – श्रीरविन्द्रकालेवर्य्यः, विषयश्च – 'MS Word as a Research Tool' इति। पत्रेऽस्मिन् विषयानुक्रमणिकायाः, पादटिप्पण्याः, पत्रान्तटिप्पण्याः, सन्दर्भग्रन्थसूचीनाञ्च एम्.एस्.वर्ड माध्यमेन सरलतया निर्माणं कथं कर्त्तव्यमिति बोधितम्।

अन्ते च आचार्य्यैः प्रो.देवेन्द्रनाथपाण्डेयवर्य्यैः अध्यक्षीयोद्बोधने समेषामपि शोधपत्राणां सारः वैशिष्ट्यञ्च प्रत्यपादि। अधिवेशनमदः ज्योतिषविभागस्य सहायिकाचार्य्या सुश्रीअपूर्वाग्रवालमहोदया समचालयत्।

२८/१२/२०२० तमे दिनाङ्के शैक्षणिकभवने सभाकक्षे वाक्यार्थपरिषदः पञ्चमाधिवेशनं सायं ०५ वादनतः समायोजितम्। कार्यक्रमे व्याकरणविभागाध्यक्षवर्याणाम् प्रो. विनोदकुमारः झा महोदयानाम् आध्यक्ष्ये शोधपत्रत्रयं पठितम्। दर्शनविभागस्य सहायकाचार्यः, डॉ. जानकीशरणाचार्यः महोदयः, साहित्यविभागस्य सहायकाचार्यः श्री जिगरभट्टः , अतिथ्यध्यापकः श्रीराजा किशोरः ओझामहोदयः शोधपत्रमाध्यमेन स्वकीयविचारान् प्रकटितवन्तः। व्याकरणविभागाध्यक्षाः प्रो. विनोदकुमारः झा महोदयाः अपि स्वकीयं शोधपत्रं पठितवन्तः। सत्रस्य समापनं धन्यवादज्ञापनात् परं पूर्णतामन्त्रेण अभवत्। सत्रस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्या कु. विदुषी बोल्ला महोदया अकरोत्।



वाक्यार्थपरिषदि उपस्थिताः अध्यापकाः

## नेट स्लेट प्रशिक्षणवर्गस्य उद्घाटनम्




श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १५/१०/२०२० तमे दिनाङ्के सायं ५ वादने webex माध्यमेन यू॰जी॰सी॰ नेट स्लेट् पाठ्यक्रमस्य उद्घाटनसत्त्रस्य आयोजनमकारि। कार्यक्रमे अध्यक्षपदे विराजमानाः आसन् – श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. गोपबन्धुमिश्रमहोदयाः। कार्यक्रमस्य सञ्चालनं व्याकरणविभागस्य सहायकाचार्यया सुश्रीविदुषीबोल्लावर्ययाऽनुष्ठितम्। कार्यक्रमस्यारम्भः वैदिकमङ्गलाचरणेन वेदविभागस्य सहाचार्यैः डॉ. शत्रुघ्नपाणिग्राहिमहोदयैः कृतः। ततः अनुस्नातकविभागाध्यक्षैः डॉ. ललितकुमारपटेलमहोदयैः महानुभावानां परिचयपूर्वकं शाब्दिकस्वागतं व्यधायि। स्वागतवाचनानन्तरं कार्यक्रमस्य वृत्तकथनं डॉ. उमामहेश्वरीवर्यया व्याहारि। वृत्तकथनात्परं कार्यक्रमस्य आमन्त्रकानां सारस्वतातिथीनां श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य कुलसचिवानां डॉ. दशरथजादवमहोदयानामुद्बोधनेन उपकृताः वयम्। एतेषामुद्बोधनानन्तरं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य पूज्यकुलपतीनां प्रो॰ गोपबन्धु-मिश्रवर्याणां आध्यक्षीयवचोभिः मार्गदर्शनं प्राप्तवन्तः। कार्यक्रमस्यान्ते वेदविभागस्य सहाचार्यैः डॉ. शत्रुघ्नपाणिग्राहिमहोदयैः कार्यक्रमे उपस्थितानां महानुभावानां धन्यवादज्ञापनं कृतम्। कार्यक्रमेऽस्मिन् विश्वविद्यालयस्य सर्वे अध्यापकाः, विभागाध्यक्षाः, छात्राश्च आहत्य ७१ महानुभावाः ऑनलाइन वेबैक्स माध्यमेन उपस्थिताः आसन्।

# संस्कारों का मानव जीवन पर प्रभाव तथा संस्कृतवाक्याभ्यासः इति ओनलाइन अल्पकालीना प्रमाणपत्रीय-योजना


श्री सोमनाथ संस्कृत विश्वविद्यालय
राजेन्द्रभुवन रोड, वेरावल, जिल्ला – गीरसोमनाथ, गुजरात – ३६२ २६६
दूरभाष : ०२८७६–२४४५२८/२९/३२ फेक्स : २४४४१७
वेबसाईट - www.sssu.ac.in E-mail - sssu.veraval@gmail.com

प्रवेश सूचना

Online Short Term Certificate Program in
"संस्कृतवाक्याभ्यासः"

गुजरात राज्य सरकार द्वारा स्थापित एवं विश्वविद्यालय अनुदान आयोग द्वारा 2(f) मान्यता प्राप्त श्री सोमनाथ संस्कृत विश्वविद्यालय द्वारा "संस्कृतवाक्याभ्यासः" इस विषय में Online Short Term Certificate Program प्रारंभ होने जा रहा है। ये प्रमाणपत्रीय योजना ऑनलाइन माध्यम से पढाई जाएगी। प्रवेश प्राप्त करने हेतु नीचे दिये लिंक पर जाकर पंजीकरण किया जा सकता है। पंजीकरण शुल्क ऑनलाइन जमा किया जा सकता है।

पंजीकरण हेतु अन्तिम दिनांक : १०/१०/२०२०
प्रमाणपत्रीय योजना का प्रारंभ : १७/१०/२०२०

प्रमाणपत्रीय योजना (Online Short Term Certificate Program) का विवरण

| | |
|---|---|
| अभ्यास की अवधि | : ३ मास – सप्ताह में तीन दिन (सोम, मंगल, बुध) |
| अध्यापन माध्यम | : ऑनलाइन Online (Faculty led Program) |
| व्याख्यान संख्या | : ३६ (विषय व्याख्यान–३० एवं अनुशिक्षण व्याख्यान–६) |
| व्याख्यान समय | : सायं ५.३० बजे से ६.३० बजे तक (सोम, मंगल, बुध) |
| परीक्षा माध्यम | : ऑनलाइन Online |
| प्रश्नपत्र संख्या | : ०२ (प्रत्येक प्रश्नपत्र के १०० अङ्क) |
| पाठ्यक्रम का शुल्क | : १५००/– रुपये (परीक्षा शुल्क सहित) |
| अध्यापन का माध्यम | : हिन्दी |

प्रवेश हेतु योग्यता
✓ १२+२ उत्तीर्ण एवं १८ वर्ष या उससे अधिक उम्र
✓ देवनागरी लिपि को पढने एवं लिखने की योग्यता
✓ संस्कृत भाषा का सामान्य ज्ञान

प्रवेश हेतु संपर्क सूत्र

दीपेश विनोद कतिरा
संयोजक एवं
सहायक आचार्य–व्याकरण विभाग
मोबाइल – ९५९४३ ५६८५७

कु. विदुषी बोल्ला
संयोजक एवं
सहायक आचार्य–व्याकरण विभाग
मोबाइल – ९८१९१ १८०२४

Register Here
https://forms.gle/zHvwCk8cB9aAMSYPA

१७.१०.२०२० तमे दिनाङ्के नवरात्रोत्सवस्य प्रथमे दिने सायं ५:०० तः ६:०० वादनं यावत् श्रीसोमनाथसंस्कृतविश्वविद्यालयेन द्वयोः ऑन-लाईन-अल्पकालिकपाठ्यक्रमयोः उद्घाटनकार्यक्रमः आयोजितः। तौ द्वौ पाठ्यक्रमौ १. संस्कारों का मानव जीवन पर प्रभाव २. संस्कृतवाक्याभ्यासः इति। विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललितपटेलमहोदयः सर्वादौ मान्यवराणां स्वागतमकरोत्। कार्यक्रमस्य अस्य मुख्यातिथित्वेन सम्प्राप्तः सौराष्ट्रविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. नितिन पेथाणी महाभागः स्वीये भाषणे संस्कृतभाषायाः, संस्काराणां च महत्त्वं सम्यक् अबोधयत्। संस्कृतभाषा, शास्त्राणि चैव भारतं मानसिकदासतायाः मुक्त्वा विश्वगुरुपदं प्रापयिष्यतः इति विश्वासः तेन प्रकटितः। अस्मै कार्यक्रमाय गुजरातराज्यस्य माननीयः मुख्यमन्त्री श्रीविजय रूपाणी महोदयः अपि शुभसन्देशं प्रेषितवान्। गुजरातराज्यस्य माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंह चूडासमा महोदयः अपि विडिओ-सन्देशं प्रेषितवान्। कार्यक्रमान्ते श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः पाठ्यक्रमद्वयेऽपि सहभागवतां प्रोत्साहात्मकानि आशीर्वचनानि अवदत्। कार्यक्रमान्ते विश्वविद्यालयस्य कुलसचिवः कार्यक्रमस्य सफलतायै यतितवद्भ्यः सर्वेभ्यः अपि धन्यतां प्राकटयत्। कार्यक्रमस्य सूत्रसञ्चालनं पुराणाचार्यः डॉ. पङ्कज रावल महोदयः अकरोत्।

एतयोः योजनयोः प्रायः १०० प्रतिभागिनः सशुल्कं भागं गृहीतवन्तः। संस्कृतवाक्याभ्यासस्य योजनायाः व्याख्यानानि प्रत्येकं सोम-मङ्गल-बुधवासरेषु तथा संस्कारों का मानव जीवन पर प्रभाव इति योजनायाः व्याख्यानानि प्रत्येकं गुरु-शुक्र-शनिवासरेषु आयोज्यन्ते।

# NAAC कार्यशाला

श्रीसोमनाथसंस्कृतविश्वविद्यालये NAAC कृते सज्जता जायमाना वर्तते। अस्मिन् विषये विशिष्टं मार्गदर्शनं कर्तुं गुजरात महाविद्यालयस्य अध्यापकः डॉ. जयेन्द्रसिंहः जादवः उपस्थितः आसीत्। एतस्य महोदयस्य मार्गदर्शने २२ तः २४/१०/२०२० तमेषु दिनाङ्केषु कार्यशालायाः आयोजनम् अभवत्। अस्याः कार्यशालायाः उद्घाटनम् २२ तमे दिनाङ्के प्रातः १० वादने मङ्गलाचरणेन सह अभवत्। आदौ डॉ. ललितकुमारः पटेलः उपस्थितानां सर्वेषां स्वागतं कृत्वा कार्यशालायाः प्रास्ताविकम् उक्तवान्। उद्घाटनसत्रे माननीयः कुलपतिः प्रो.गोपबन्धुमिश्रः अध्यापकानां कर्मचारिणां च मार्गदर्शनम् अकरोत्। ततः त्रिदिनपर्यन्तं विश्वविद्यालयस्य सर्वेऽपि अध्यापकाः कर्मचारिणः च स्वविभागे किं कार्यं कया रीत्या कर्तव्यम् इति डॉ. जयेन्द्रसिंह-जादवमहोदयस्य मार्गदर्शनं प्राप्तवन्तः। अस्याः कार्यशालायाः समापनम् २४ तमे दिनाङ्के सायं ०४ वादने अभवत्।






## नवरात्रोत्सवः





श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २३/१०/२०२० तमे दिनाङ्के आश्विनमासे शुक्लपक्षे शुक्रवासरे एकदिवसात्मको नवरात्रोत्सवः समायोजितः आसीत्। अस्मिन् उत्सवे विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुः मिश्रः महोदयः, आदरणीयः कुलसचिवः डॉ. दशरथ जादवः महोदयः, अनुस्नातकविभागाध्यक्षः डॉ. ललित पटेलः महोदयः, विश्वविद्यालयसञ्चालितस्य महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार एल् पण्डया महोदयः, विविधसङ्कायाध्यक्षाः प्राध्यापकाः, अधिकारिणः कर्मचारिणश्च समुपस्थिताः आसन्। कार्यक्रमेऽस्मिन् विशेषातिथिरूपेण नेकविषयनिष्णातः डॉ. जयेन्द्रसिंहः जादवः महोदयः आसीत्। भगवत्याः केनेड्यायाः सरस्वत्याः पञ्चोपचारैः पूजनं नीराजनञ्च डॉ. पङ्कज रावल महोदयेन कारितम्। सर्वैः मिलित्वा भगवत्याः जगदम्बिकायाः समाराधना विहिता। सर्वैरपि सोत्साहं भागः गृहितः। एतस्य कार्यक्रमस्य संयोजनं प्रो. महेन्द्रकुमार दवे महोदयः अकरोत्।

## भवनद्वयस्य शिलान्यासः, "सुधर्मा" सम्मेलनसदनस्य लोकार्पणं च

श्रीसोमनाथसंस्कृतविश्वविद्यालये "प्रभासज्योतिः" शैक्षणिक- भवनस्य उपरि शिक्षाशास्त्रिमहाविद्यालयस्य नूतनं भवनं निर्माणाधीनं वर्तते तथा माननीय-कुलपतिभवनस्य सम्मुखे कुलसचिवभवनं निर्माणाधीनं वर्तते। एतयोः द्वयोः भवनयोः ई-शिलान्यासः तथा अत्याधुनिकस्य "सुधर्मा" इति नामधेयस्य सम्मेलनसदनस्य लोकार्पणकार्यक्रमः २४/१०/२०२० तमे दिनाङ्के वेबेक्स माध्यमेन आयोजितः।

अस्य कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः आसीत्। कार्यक्रमे आदौ कुलसचिवः डॉ. दशरथः जादवः स्वागतप्रवचनम् अकरोत्। ततश्च अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण गुजरातराज्यस्य माननीयः शिक्षणमन्त्री श्रीभूपेन्द्रसिंह चुडासमा महोदयः आमन्त्रितः आसीत् किन्तु कार्यवशात् सः उपस्थातुं न शक्तवान् अतः तस्य सन्देशं डॉ. ललितकुमारः पटेलः महोदयः अपठत्। अध्यक्षरूपेण माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः अभाषत। अन्ते महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमारः पण्ड्या महोदयः धन्यवादभाषणम् अकरोत्। अयं कार्यक्रमः वेबेक्स माध्यमेन आयोजितः आसीत्, तत्र विश्वविद्यालयस्य अध्यापकाः कर्मचारिणश्च संयुक्ताः अभवन्। फेसबुक माध्यमेन अस्य कार्यक्रमस्य जीवन्त-प्रसारणम् अभवत्।



भवनद्वयस्य शिलान्यासप्रसङ्गे भाषमाणः माननीयः कुलपतिवर्यः



भवनद्वयस्य शिलान्यासप्रसङ्गे भाषमाणः कुलसचिववर्यः

## तत्त्वाचार्य-प्रवेशपरीक्षा

श्रीसोमनाथसंस्कृतविश्वविद्यालये तत्त्वाचार्यं कर्तुम् इच्छुकानां कृते प्रवेशपरीक्षायाः आयोजनं प्रतिवर्षं भवति। अस्मिन् वर्षे कोरोनाकारणेन अन्यराज्याणां परीक्षार्थिनः आगन्तुम् अशक्ताः आसन् अतः तेषां सुगमतायै वेरावलस्थे विश्वविद्यालयपरिसरे तथा उडिसायां भुवनेश्वरस्थे उत्कलविश्वविद्यालये इति द्वयोः केन्द्रयोः तत्त्वाचार्यस्य प्रवेशपरीक्षायाः आयोजनम् २७/१०/२०२० तमे दिनाङ्के अभवत्। द्वयोः केन्द्रयोः आहत्य ४२ परीक्षार्थिनः परीक्षां प्रदत्तवन्तः।

## व्याकरणविषयकः ओनलाइन परिसंवादः (वेबिनार)

२७-१०-२०२० तमे दिनाङ्के श्रीसोमनाथ-संस्कृत-युनिवर्सिटी IQAC, अनुस्नातक-विभागः तथा युनिवर्सिटी-संचालित-संस्कृत-कॉलेज इत्येतासां संस्थानां संयुक्त-तत्त्वाधाने 'प्रादेशिकभाषाभिः सह संस्कृतव्याकरणस्य सम्बन्धः' इति व्याकरणविषयकः ओनलाइन परिसंवादः (वेबिनार) आयोजितः। अस्य उद्घाटनकार्यक्रमे कामेश्वरसिंहदरभङ्गा-संस्कृत-विश्वविद्यालयस्य माननीयः कुलपतिमहोदयः प्रो. शशिनाथ झा महोदयः मुख्यवक्तृत्वेन विशिष्टातिथित्वेन समुपस्थाय सदसः मार्गदर्शनमकरोत्। उद्घाटनसत्रे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः आध्यक्ष्यम् ऊढवान्। सत्रारम्भे प्रो. विनोद कुमार झा महोदयः मान्यवराणां स्वागतेन सहितं वेबिनारस्य प्रास्ताविकम् अकरोत्। सत्रेऽस्मिन् विश्वविद्यालयस्य व्याकरणप्राध्यापिका कुमारी विदुषी बोल्ला महोदया, दमण- प्रदेशस्य सर्वकारीयमहाविद्यालयस्य संस्कृतप्राध्यापकः डॉ. पङ्कज जाजे तथा डाकोरसंस्कृतमहाविद्यालयस्य प्राध्यापकः डॉ. रविशङ्कर राजगोर स्वीयानि शोधपत्राणि पठितवन्तः। सत्रेऽस्मिन् विश्वविद्यालयस्य अनुस्नातकविभागाध्यक्षः डॉ. ललित पटेल महोदयः धन्यवादार्पणम् अकरोत्।

प्रो.विनोद कुमार झा महोदयः वेबिनारस्य अस्य द्वितीयस्य सत्रस्य आध्यक्ष्यम् अपि ऊढवान्। द्वितीयस्य सत्रस्य सञ्चालनमकरोत् कुमारी विदुषी बोल्ला महाभागा। सम्पूर्णे वेबिनारे आहत्य १५ शोधपत्राणि पठितानि। अस्य वेबिनारस्य मुख्यसंयोजकत्वं प्रो. विनोद कुमार झा महोदयः, संयोजकत्वं च डॉ. दीपेश विनोद कतिरा ऊढवान्।





## वादविवादस्पर्धा




वादविवादस्पर्धायां
प्रतिभागी छात्रः
रविः रादडीया




वादविवादस्पर्धायां
प्रतिभागी छात्रः
निकुञ्जः दवे

वर्ल्ड ऑफ वैली एवं महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य च संयुक्ततत्त्वावधाने वादविवादप्रतियोगिता २९/१०/२०२० तमे दिनाङ्के प्रातः १०.३० वादनतः ०१ वादनपर्य्यन्तम् आयोजिता आसीत्। अस्यां प्रतियोगितायां उत्तराखण्ड संस्कृत विश्वविद्यालय, महर्षि पाणिनि संस्कृत वैदिक विश्वविद्यालय, श्रीवेङ्कटेश्वर वैदिक विश्वविद्यालय, श्रीसोमनाथ संस्कृत विश्वविद्यालय इति चतुर्णां विश्वविद्यालयानां छात्राः भागं गृहीतवन्तः।

वादविवादस्य विषयः आसीत् – 'राज्यसमृद्धिचिन्तनं सम्यक् उताहो राष्ट्रसमृद्धिचिन्तनम्' इति। तत्र अस्माकं विश्व- विद्यालयतः ९ छात्राः नामाङ्कनं कारितवन्तः। एवमस्याः प्रतियोगितायाः निर्णायकौ स्तः – डॉ. जानकीशरणाचार्यः, डॉ. दीपेशः कतिरा महोदयश्च। अस्याः प्रतियोगितायाः संयोजिका डॉ. उमामहेश्वरी आसीत् । एवञ्च सञ्चालनं सुश्रीविदुषी बोल्लामहोदययाकारि।

# साहित्यविषयकः ओनलाइन परिसंवादः (वेबिनार)




२८-१०-२०२० तमे दिनाङ्के श्रीसोमनाथ- संस्कृत- युनिवर्सिटी IQAC, अनुस्नातक- विभागः तथा युनिवर्सिटी- संचालित- संस्कृत- कॉलेज इत्येतासां संस्थानां संयुक्त- तत्त्वाधाने साहित्यविषयकः ओनलाइन परिसंवादः (वेबिनार) समायोजितः। अस्य विषयः आसीत् "प्रादेशिकभाषाणां पद्यसाहित्ये संस्कृतसाहित्यस्य प्रभावः"। अस्य परिसंवादस्य उद्घाटनं प्रातः ११ वादने श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयकुलपतेः प्रो. गोपबन्धुमिश्रमहाभागस्य अध्यक्षतायां सम्पन्नम्। अस्मिन् उद्घाटनसत्रे आरम्भे गृहपतिः श्रीभाविनपण्ड्या मङ्गलाचरणम् अकरोत्। ततश्च प्रो. अर्चनाकुमारी दूबे महोदया सर्वेषां शाब्दिकं स्वागतं प्रास्ताविकं च अकरोत्।

अस्मिन् सत्रे त्रीणि शोधपत्राणि प्रस्तुतानि तथा अतिथिरूपेण उपस्थितेन प्रो. हरिहरहोतृमहोदयेन विशिष्टं शोधपत्रं प्रस्तुतम्। मान्यः कुलपतिवर्यः प्रो. गोपबन्धुमिश्रः अध्यक्षभाषणम् अकरोत्। अस्य सत्रस्य अन्ते डॉ. डाह्यालाल मोकरिया महोदयः धन्यवादज्ञापनम् अकरोत्। अस्य सत्रस्य सञ्चालनं श्रीजिगरः भट्टः अकरोत्।

अस्य परिसंवादस्य द्वितीयं सत्रं मध्याह्ने ०३ वादने आरब्धम्। अस्य द्वितीयसत्रस्य अध्यक्षः डॉ. ललितकुमारः पटेलः आसीत्। अस्मिन् सत्रे १३ शोधपत्राणि प्रस्तुतानि अभवन्। शोधार्थिनां शोधपत्रपठनानन्तरम् अध्यक्षः डॉ. ललितकुमारः पटेलः विशिष्टं शोधपत्रं प्रस्तुतवान् आध्यक्षीयभाषणं च कृतवान्। अस्य सत्रस्य सञ्चालनम् अन्ते च धन्यवादज्ञापनं श्रीजिगरः भट्टः अकरोत्।

अस्य सम्पूर्णकार्यक्रमस्य मार्गदर्शनम् अनुस्नातकविभागाध्यक्षेण डॉ. ललितकुमार-पटेल-महोदयेन तथा प्राचार्येण डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयेन अक्रियत। कार्यक्रमस्य मुख्यसंयोजकत्वेन प्रो. अर्चनाकुमारी दूबे महोदया कार्यम् अकरोत् तथा सहसंयोजकत्वेन डॉ. डाह्यालाल मोकरिया महोदयः कार्यम् अकरोत्।

## सरदारपटेलजयन्ती

३१/१०/२०२० तमे दिनाङ्के सरदार वल्लभभाई पटेल महोदयानां जन्मदिनमुपलक्ष्य राष्ट्रिय-एकता-दिनम् आचर्यते। श्रीसोमनाथसंस्कृत- विश्व विद्यालये अस्मिन् दिने विशिष्टव्याख्यानस्य आयोजनम् अभवत्। सर्वादौ माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः विश्वविद्यालयस्य सभाभवने स्थितायाः सरदारपटेलवर्याणां प्रतिमायाः पुष्पमालिकया अर्चनाम् अकरोत्। ततः अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः प्रास्ताविकं शाब्दिकं स्वागतं च कृतवान्। अस्मिन् अवसरे सरदार पटेल विश्वविद्यालयस्य इतिहासविभागस्य अध्यापकः डॉ. वसन्तकुमारः पटेलः सरदार वल्लभभाई पटेल वर्याणां विषये अतीव रोचकं ज्ञानप्रदं च व्याख्यानम् अकरोत्। अस्य कार्यक्रमस्य अध्यक्षः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः सरदारमहिमामण्डनसहितम् आध्यक्षीयम् अभाषत। अस्मिन् अवसरे डॉ. जयेशकुमारः मुंगरा महोदयः सर्वेभ्यः राष्ट्रिय-एकतायाः शपथग्रहणम् अकारयत्। अन्ते कुलसचिवः डॉ. दशरथ-जादवमहोदयः सर्वेषां धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य आयोजनम् ओनलाइन वेबेक्स माध्यमेन कृतमासीत्। तत्र सर्वेऽपि अध्यापकाः कर्मचारिणः छात्राः च सम्मिलिताः आसन्। अस्य प्रसारणं फेसबुक उपरि कृतमासीत्, तत्र ३७६ जनाः एनं कार्यक्रमं दृष्टवन्तः। अस्य कार्यक्रमस्य संयोजनम् अध्यापिका अपूर्वा अग्रवालः कृतवती।








# भारतीय-संविधान-दिवसान्तर्गतम् ओनलाईन विशिष्टं व्याख्यानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन २६/११/२०२० दिनाङ्के भारतीय-संविधान-दिवसान्तर्गतम् "भारत के संविधान का परिचय" इति विषयमधिकृत्य ओनलाइन विशिष्टं व्याख्यानम् आयोजितम्। अस्य कार्यक्रमस्य आरम्भे अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार-पटेलः महानुभावानां परिचयं प्रदाय स्वागतं कृतवान्। अस्मिन् कार्यक्रमे मुख्यवक्तृरूपेण सरदार-पटेल-विश्वविद्यालयस्य सहायकाचार्यः डॉ. अर्पित पाटडीया महोदयः संविधानस्य परिचयात्मकं विशिष्टं व्याख्यानं प्रदत्तवान् तथा संविधानस्य सम्माननं कर्तुं प्रतिज्ञाग्रहणमपि कारितवान्। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धु-मिश्रः आध्यक्षीयम् उद्बोधनम् अकरोत्। सम्पूर्णस्यास्य कार्यक्रमस्य आयोजनं सञ्चालं च शारीरिकशिक्षणस्य अध्यापकः डॉ. जयोशकुमार-मुङ्गरा अकरोत्। अयं कार्यक्रमः वेबेक्स माध्यमेन आयोजितः, तत्र सर्वेऽपि अध्यापकाः कर्मचारिणः च संयुक्ताः अभवन्। कार्यक्रमस्य प्रसारणं फेसबुक माध्यमेन अपि कृतं, तत्र ६९१ जनाः इमं कार्यक्रमम् अवलोकितवन्तः।






भारतीयसंविधानदिवसे आयोजिते व्याख्याने उपस्थिताः महानुभावाः

# मतदातृ-जागृति-कार्यक्रमः

श्रीसोमनाथसंस्कृतविश्वविद्यालयः तथा समाहर्तृ-कार्यालयः, वेरावलम्, इत्यनयोः संयुक्तोपक्रमेण २६/११/२०२० तमे दिनाङ्के ओनलाइन मतदातृ-जागृति-कार्यक्रमः समायोजितः। अस्मिन् कार्यक्रमे श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः, गीर-सोमनाथ-जनपदस्य समाहर्ता श्रीमान् अजय-प्रकाशः, जनपदनिर्वाचनविभागस्य अधिकारी श्रीमान् विनोदचन्द्रः प्रजापतिः, श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः कर्मचारिणः छात्राः च उपस्थिताः आसन्। यस्य छात्रस्य वयः १८ वर्षेभ्यः अधिकं जातमस्ति तस्य निर्वाचनपरिचयपत्राय मार्गदर्शनं कर्तुम् अयं कार्यक्रमः समायोजितः आसीत्। अस्मिन् सन्दर्भे श्रीमान् विनोदचन्द्रः प्रजापतिः ओनलाइन निर्वाचनपरिचयपत्राय किं कथं च करणीयमिति मार्गदर्शनम् अकरोत्। माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रः लोकशासनं प्रति अस्माकं कर्तव्यम् किमस्ति तथा निर्वाचने मतदानं कृत्वा वयं कथं परिवर्तनम् आनेतुं शक्नुमः इति विषये उद्बोधनम् अकरोत्। समाहर्ता श्रीमान् अजय-प्रकाशः सर्वेभ्यः मताधिकारस्य उपयोगं कर्तुं मार्गदर्शनं कृतवान्। अस्य कार्यक्रमस्य सञ्चालनं डॉ. जयेशकुमार मुंगरा महोदयः अकरोत् तथा संयोजनं तकनीकिसाहाय्यं श्रीहरेश-खेर-महोदयः अकरोत्। अयं कार्यक्रमः वेबेक्समाध्यमेन समायोजितः आसीत् तथा तस्य प्रसारणं फेसबूक माध्यमेन कृतमासीत्।




माननीयः कुलपतिवर्यः तथा गीर-सोमनाथजनपदस्य समाहर्त्ता





मतदातृ-जागृति-कार्यक्रमे उपस्थिताः महानुभावाः

## छात्राणां कृते समायोजितः अभिविन्यासः कार्यक्रमः







श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ०३/११/२०२० तमे दिनाङ्के मध्याह्ने १२ वादने अस्मिन् विश्वविद्यालये सञ्चाल्यमानायाः राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः कार्ययोजनायाः अन्तर्गतं सर्वेषां छात्राणां कृते छात्राणां कृते अभिविन्यासः कार्यक्रमः समायोजितः आसीत्। यत्र शताधिकं छात्राः, अध्यापकाश्च भागं गृहीतवन्तः।

सम्प्रति श्रीसोमनाथसंस्कृतविश्वविद्यालयेन राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषत्पक्षतः मूल्याङ्कनं विधातुं पूर्वसिद्धता जायमाना अस्ति। एतदन्तर्गतं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य सर्वेषा छात्राणां कृते नैक-प्रश्नानां विषये जागरूकतासम्पादनाय आयोजिते अस्मिन् कार्यक्रमे अनुस्नातकविभागाध्यक्षः डॉ. ललितकुमार पटेलः विश्वविद्यालयस्य परिचयम्, उद्देश्यं, लक्ष्यादिकं छात्रेभ्यः प्रस्तुवान्। तदनु दर्शनप्राध्यापकः डॉ. जानकीशरण आचार्यः सुष्टुतया राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा प्रक्ष्यमाणां प्रश्नानां छात्रैः सह सविशदतया चर्चां विधाय स्वस्य उद्बोधनं दत्तवान्। अस्मिन् अवसरे नैक-विशेषज्ञः डॉ. जयेन्द्रसिहं जादवः अपि प्रासङ्गिकं मार्गदर्शनं छात्रेभ्यः प्रायच्छत्। तदनु कुलसचिवेन डॉ. दशरथ जादव-वर्येणापि प्रसङ्गोचितं वक्तव्यं प्रदत्तम्। अस्य अभिविन्यासकार्यक्रमस्य आध्यक्ष्यं विहितवता कुलपतिना प्रो. गोपबन्धुमिश्रवर्येण उक्तं यत् श्रीसोमनाथसंस्कृतविश्वविद्यालयः राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदि उत्तमं क्रमं प्रासुं कृतसङ्कल्पोऽस्ति। सर्वेषां सहयोगेन एवम् उत्तमः क्रमः प्राप्तु शक्यः इति। अस्मिन् कार्यक्रमे सर्वेभ्यः धन्यताज्ञापनं नैक-मुख्यसंयोजकः प्रो. देवेन्द्रनाथ पाण्डेयः अकरोत्। अस्य समग्रस्य अभिविन्यासकार्यक्रमस्य सङ्कलनं संयोजनं च डॉ. जानकीशरण आचार्यः अकरोत्।

## जात्याधारित-अत्याचार-निवारण-कार्यक्रमः

१०/१२/२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य राष्ट्रिय-सेवा-योजना-विभागद्वारा जात्याधारित-अत्याचाराणां निवारणाय जातिसमानतायै च एकं विशिष्टं व्याख्यानम् आयोजितम्। अस्य कार्यक्रमस्य अध्यक्षः प्रो. महेन्द्रकुमारः दवे महोदयः आसीत्। तेन जातिसमानतायै विशिष्टं व्याख्यानमपि प्रदत्तम्। डॉ. जयेशकुमारः मुङ्गरा महोदयः अस्मिन् कार्यक्रमे प्रतिज्ञावाचनम् अकारयत्। अस्य कार्यक्रमस्य सञ्चालकत्वेन डॉ. डी. एम. मोकरीया महोदयः कार्यम् अकरोत्। अस्मिन् कार्यक्रमे विश्वविद्यालयस्य सर्वेऽपि अध्यापकाः कर्मचारिणः छात्राः च वेबेक्स माध्यमेन उपस्थिताः आसन्। अस्य संयोजनं डॉ. जयेशकुमारः मुङ्गरा डॉ. डी.एम. मोकरीया च अकुरुताम्।



**સોમનાથ સંસ્કૃત યુનિ. દ્વારા જાતિય સમાનતાની પ્રતિજ્ઞાનો કાર્યક્રમ યોજાયો**

(વિશાલ ઘીયા દ્વારા)

વેરાવળ,તા.૧૧

શ્રી સોમનાથ સંસ્કૃત યુનિવર્સિટી દ્વારા તારીખ ૧૦ ડિસેમ્બર ૨૦૨૦ ના રોજ જાતીય સમાનતા ની પ્રતિજ્ઞા નો વિશેષ કાર્યક્રમ આયોજિત કરવામાં આવ્યો. આ કાર્યક્રમ ઓનલાઈન વેબેક્સ ના માધ્યમથી આયોજિત થયો જેમાં વિશ્વવિદ્યાલયના તમામ અધ્યાપકો અને વિદ્યાર્થીઓ જોડાયા. જાતીય સમાનતા અંગે વિભાગના અધ્યાપક ડોક્ટર મહેન્દ્ર દવેજી એ માર્ગદર્શન આપ્યું .ડોક્ટર જયેશ મુંગરા જી પ્રતિજ્ઞા વાંચન કરાવવાનું કાર્ય કર્યુ. ડોક્ટર ડાહ્યાભાઇ મોકરીયાજી એ સમગ્ર કાર્યક્રમનું સફળતાપૂર્વક સંચાલન કર્યુ .દરેક અધ્યાપક અને વિદ્યાર્થીએ વેબસાઈટ ઉપર જાતીય સમાનતા ની પ્રતિજ્ઞા લઇ પ્રમાણપત્ર મેળવ્યું.




# शास्त्रपरिचयप्रकल्पान्तर्गतं सज्जानां ३६ विडिओ-पाठानां लोकार्पणम्

११.१२.२०२०तमे दिनाङ्के सायं ५:०० वादने शास्त्रपरिचयप्रकल्पान्तर्गतं सज्जानां ३६ विडिओ-पाठानां लोकार्पणकार्यक्रमः ऑनलाईन-माध्यमेन सम्पन्नः। कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतयुनिवर्सिट्याः माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय अस्य शास्त्रपरिचयप्रकल्पस्य प्रासङ्गिकतां प्रत्यपादयत्। कार्यक्रमे अस्मिन् मुख्यातिथित्वेन उपस्थितः गोधरास्थायाः श्रीगोविन्दगुरुयुनिवर्सिट्याः कुलपतिः प्रो. प्रतापसिंह चौहाण महोदयः संस्कृतवाङ्मयस्य महत्त्वं बोधितवान्।

जयपुरस्थस्यजगद्गुरुरामानन्दाचार्यसंस्कृतविश्वविद्यालय-स्य कुलपतिमहाभागा प्रो. अनुला मौर्य महोदया अस्मिन् कार्यक्रमे सारस्वतातिथित्वेन उपस्थिता आसीत्। सा एतं प्रकल्पं बहुशः श्लाघितवती। महानुभावानं परिचयं कारितवान् श्रीसोमनाथसंस्कृतयुनिवर्सिट्याः अनुस्नातक- विभागाध्यक्षः डॉ. ललितकुमार पटेल महोदयः। सर्वैरपि महानुभावैः सम्भूय एतेषां विडिओ-पाठानां लोकार्पणं कृतम्। कार्यक्रमान्ते विश्वविद्यालयसञ्चालितमहाविद्यालय- स्य प्राचार्यः प्रि. नरेन्द्रकुमार पण्ड्या महोदयः। अस्य कार्यक्रमस्य सूत्रसञ्चालनं साहित्यविभागस्य सहायकाचार्येण श्रीजिगरभट्टमहोदयेन कृतम्।



दिव्याङ्गजागृति-अभियानम्


दिव्याङ्गजागृति-अभियान-कार्यक्रमे मङ्गलाचरणं कुर्वन् श्रीभाविनः पण्ड्या

## दिव्याङ्ग-जागृति-अभियानम्

श्रीसोमनाथसंस्कृतविश्वविद्यालयेन दिव्याङ्ग- जनानाम् उत्साहवर्धनाय १२.१२.२०२० तमे दिनाङ्के सायं ५:०० वादने दिव्याङ्ग-जागृति-अभियानस्य अङ्गतया विशिष्टं व्याख्यानम् ऑनलाईन-माध्यमेन समायोजितम्। कार्यक्रमे अस्मिन् श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धुमिश्रमहोदयः अध्यक्षत्वेन उपस्थाय दिव्याङ्ग-जागृतिविषयकं मार्गदर्शनम् अकरोत्। अस्य कार्यक्रमस्य मुख्यवक्तृरूपेण डो. कृणाल-जोषी-महोदयः दिव्याङ्गजागृति- विषये उत्साहवर्धकं प्रेरकं च व्याख्यानं प्रदत्तवान्। विश्वविद्यालय-सञ्चालित-महाविद्यालयस्य प्राचार्यः प्रि. डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयः महानुभावानां परिचयं कारितवान्। विश्वविद्यालयस्य प्राध्यापकः डो. जयेशकुमार-मुङ्गरा-महोदयः कार्यक्रमान्ते धन्यवादज्ञापनम् अकरोत्। अस्य कार्यक्रमस्य सूत्रसञ्चालनं ज्योतिषविभागस्य सहायकाचार्येण श्रीनित्यानन्द-ओझा-महोदयेन कृतम्। दिव्याङ्ग-जागृति-अभियानस्य संयोजकौ डो. आशाबेन-माढक तथा डो. जयेशकुमार-मुङ्गरा आस्ताम्।



पुराणविषयक-परिसंवादस्य उद्घाटनकार्यक्रमः



पुराणधर्मशास्त्रविषयके परिसंवादे उपस्थिताः महानुभावाः

## पुराण-धर्मशास्त्रयोः राष्ट्रियः परिसंवादः (वेबिनार)

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा २३/१२/ २०२० तमे दिनाङ्के बुधवासरे एकदिवसात्मकः "पुराणधर्मशास्त्रयोः आदर्शजीवन स्वरूपम्" इति विषयकः परिसंवादः (वेबिनार) समायोजितः। अत्र एकत्रिंशत् शोधार्थिनः आभारतात् संलग्नाः जाताः आसन्। अस्मिन् परिसंवादे उद्घाटनसत्रे मुख्यातिथिरूपेण झारखण्डस्य कोल्हान-विश्वविद्यालयस्य कुलपतिचरः प्रो. गङ्गाधर- पण्डा महोदयः आसीत्। प्रो. गङ्गाधरपण्डा महोदयेन रामायणमहाभारतादारभ्य अष्टादशपुराणोप- पुराणानां धर्मशास्त्राणां स्मृतीनां ससन्दर्भप्रसङ्गं सारस्वतभाषणं प्रदत्तम्।

अस्मिन् कार्यक्रमे अध्यक्षरूपेण माननीयः कुलपतिः प्रो. गोपबन्धु-मिश्र-महोदयः उपस्थाय विशिष्टं मार्गदर्शनम् उद्बोधनं च अकरोत्। ततः अस्य परिसंवादस्य प्रथमसत्रम् आरब्धम्। अस्य सत्रस्य अध्यक्षपदे ब्रहमर्षि-संस्कृत-महाविद्यालयस्य प्रधानाचार्यः आधुनिककविश्च डो. अमृतलाल-भोगायता-महोदयः आसीत्। द्वितीयसत्रे विश्वविद्यालयेन सञ्चालितस्य महाविद्यालयस्य प्राचार्यः डॉ. नरेन्द्रकुमार-पण्ड्या-महोदयः अध्यक्षत्वेन उपस्थाय शोधपत्रप्रस्तोतृणां मार्गदर्शनम् अकरोत्। अस्य कार्यक्रमस्य संयोजनं डॉ. पंकजकुमारः रावलः डॉ. आशा माढकः च अकुरुताम्। सम्पूर्णोऽयं कार्यक्रमः वेबेक्स माध्यमेन आयोजितः आसीत्। कार्यक्रमान्ते डॉ. आशा माढक सर्वेषाम् अतिथीनां महानुभावानां शोधपत्रप्रस्तोतृणां च धन्यवादज्ञापनम् अकरोत्।


वेदविषयके परिसंवादे अध्यक्षपदे भाषमाणः प्रो. गोपबन्धुमिश्रवर्यः


वेदविषयके परिसंवादे भाषमाणः श्रीराममूर्तिः चतुर्वेदी महोदयः


वेदविषयके परिसंवादे संचालकः डॉ. शत्रुघ्नः पाणिग्राही महोदयः

## वेदविषयकः राष्ट्रियः परिसंवादः (वेबिनार)

श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा पूज्यानां कुलपतिवर्याणामाध्यक्षे प्रेरणया मार्गदर्शनेन च “वेदाध्ययनम् आधुनिकसमाजश्च” इति विषयमाश्रित्य एकः वेदविषयकः परिसंवादः(वेबिनार) २४/१२/२०२ तमे दिनाङ्के गुरुवासरे समायोजितः। कार्यक्रमेऽस्मिन् २७ शोधपत्राणि शोधकृद्भिः प्रस्तुतानि आसन्। अस्मिन् परिसंवादे उद्घाटनसत्रे मुख्यातिथिरूपेण महात्मा गान्धी काशीविद्यापीठस्य संस्कृतविभागस्य पूर्वतनविभागाध्यक्षः प्रो. राममूर्ति-चतुर्वेदिमहोदयः सम्प्राप्तः।

अस्याः संगोष्ठ्याः प्रारम्भः पूर्वाह्णे एकादशवादने काण्वशाखीयवैदिकमङ्गलाचरणेन प्रारब्धः। अस्य सत्रस्य सत्राध्यक्षपदं विभूषितवान् अस्माकं श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. गोपबन्धु-मिश्र-महोदयः। सञ्चालकः डॉ. शत्रुघ्नः पाणिग्राही महोदयः आसीत्। तत्र मुख्यातिथिमहोदयस्य वक्तव्यसारः आसीत् यत् वेदस्य समाजसम्बद्धाः सन्देशाः आधुनिकसमाजसमृध्यै लोके अस्माभिर्वैदिकैः प्रसारणीयाः इति। ततश्च अध्यक्षपदे आसीनस्य मान्यस्य कुलपतिवर्यस्य वक्तव्यसारः अयमासीत् यत् वेदस्तु सम्पूर्णविश्वसमाजस्य विषये मार्गदर्शनं करोति। तस्मात् यानि नैतिकमूल्यानि, कृषि-वाणिज्यादिसम्बद्धानि वैज्ञानिकतत्त्वानि वैदिकमन्त्रेषु ब्राह्मण-आरण्यक-उपनिषत्सु च निहितानि सन्ति, तानि तत्त्वानि आधुनिकसमाजे व्यवहर्तव्यानि। अस्मिन् सत्रे धन्यवादविज्ञापनं व्याकरणविभागाध्यक्षः प्रो. विनोदकुमार-झा महोदयः अकरोत्। अस्य कार्यक्रमस्य द्वितीयं सत्रम् अपराह्णे द्विवादने प्रो. देवेन्द्रनाथ-पाण्डेय-महोदयस्य आध्यक्षत्वे प्रारब्धम्। अस्मिन् सत्रे सत्रसञ्चालकः आसीत् श्रीविपुलकुमार-जादवमहोदयः। सत्रमिदं ५.०० वादनं यावत् प्राचलत्। एवम् अयं कार्यक्रमः सफलतया विश्वविद्यालयेन समायोजितः।

# अध्यापकानाम् उपलब्धयः

डॉ. ललितकुमारः पटेलः

१. गोविन्दगुरुविश्वविद्यालयेन आयोजिते "नूतन राष्ट्रिय शिक्षा नीति" विषयके सत्रे मुख्यवक्तृरूपेण व्याख्यानप्रदानम्। (३१/०८/२०२०)
२. रघुवंशम् कथं पठेम योजनायां १० व्याख्यानानि प्रदत्तानि।
३. "पत्राचार द्वारा संस्कृतम्" योजनायाः अष्टमपाठस्य रेकोर्डिंग कृतम्। (१४/०९/२०२०)
४. अमरेली जनपदशिक्षणमण्डलेन आयोजिते "नूतन राष्ट्रिय शिक्षा नीति" विषयके सत्रे मुख्यवक्तृरूपेण व्याख्यानप्रदानम्। (१२/०९/२०२०)
५. "भारतीयरदर्शनसिद्धान्तप्रभा" पुस्तके "भारतीय दार्शनिक विचार के परिप्रेक्ष में आनन्दसागर में सृष्टिप्रक्रिया की प्रायोजना" विषये लेखः प्रकाशितः। (ISBN-978-93-83097-35-7)
६. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रकाशितायाः शास्त्रपरिचायिकायाः साहित्यपरिचयविभागस्य लेखकत्वेन कार्यम् अकरोत्। (ISBN 978-93-83097-44-9)
७. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते पुराणविषयके राष्ट्रियपरिसंवादे "रामायणस्य अयोध्याकाण्डे सीतायाः चरित्रम्" इति विषये शोधपत्रं प्रस्तुतम्।
८. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते वेदविषयके राष्ट्रियपरिसंवादे "तक्मन् सूक्तस्य वैज्ञानिकत्वम्" इति विषये शोधपत्रं प्रस्तुतम्।
९. भावनगर-विश्वविद्यालयेन आयोजितायां विद्यावारिधिकार्यशालायाम् "रामायणस्य समीक्षीतं पाठसम्पादनम्" इति विषये व्याख्यानं प्रदत्तम्।

डॉ. नरेन्द्रकुमारः पण्ड्या

१. श्रीगोविन्दगुरुविश्वविद्यालय-गोधराद्वारा ११/०७/२०२० दिनाङ्के आयोजिते राष्ट्रियसंस्कृतकविसम्मेलने स्वरचितकाव्यानां पाठः कृतः।
२. दिनाङ्क - १२/७/२०२० तः १४/०७/२०२० पर्यन्तं श्रीभागवतविद्यापीठद्वारा समायोजिते षोडशग्रन्थव्याख्यानमालायां भक्तिवर्धिनी ग्रन्थे मुख्यवक्तृरूपेण दिनत्रयं व्याख्यानं फेसबुकमाध्यमेन कृतम्।
३. दिनाङ्क - ०६/०८/२०२० दिवसे श्रीब्रह्मर्षिसंस्कारधाम एवं गुजरात अकादमीद्वारा संयोक्तोपक्रमे फेसबुकद्वारा विशिष्टं व्याख्यानं प्रस्तुतम्।
४. दिनाङ्क - ०७/०८/२०२० दिवसे तयो उपर्युक्तसंस्थयोः संयुक्तोपक्रमे कविसम्मेलनं समायोजितं तत्र अध्यक्षत्वेन दायित्वं स्वरचितकाव्यपाठप्रस्तुतिः च कृता।
५. श्रीसोमनाथसंस्कृतविश्वविद्यालयः एवं श्रीगोविन्दगुरुविश्वविद्यालय गोधराद्वारा समायोजितायां 'नटराजवन्दना' इति व्याख्यानमालायां श्रावणमासस्य तृतीये सोमवासरे दिनाङ्क - १०/०८/२०२० दिवसे 'शिवपुराणे अष्टमूर्तयः विभूतियोगश्च' इति विषये युट्युबलाइवमाध्यमेन व्याख्यानं प्रस्तुतम्।
६. श्रीसोराष्ट्रविस्तारसंस्कृताध्यापकपरिषद्, राजकोटम् एवं डॉ.आर.एन.वारोतरीया महिला विनयन महाविद्यालयः, जामखम्भालिया इत्यनयोः संयुक्तोपक्रमे आयोजितायां संस्कृतज्ञानसङ्गमव्याख्यानमालायां 'श्रीमद्भागवते सद्धर्मनिरूपणम्' इत्यस्मिन् विषये १०/०९/२०२० दिनाङ्के फेसबुकद्वारा लाइवव्याख्यानं प्रस्तुतम्।
७. श्रीमुम्बई विद्वत् परिषद्वारा समायोजित रुद्राष्टाध्यायी व्याख्यानमालायां 'महच्छिर-रुद्रजटा' रुद्राष्टाध्याय्यां षष्ठः-सप्तमयोः अध्याययोः १८/०८/२०२० दिनाङ्के युट्युबफेसबुकलाईव व्याख्यानं प्रस्तुतम्।
८. दिनाङ्क - ०३/०९/२०२० तः ०५/०९/२०२० एवं १०/०९/२०२० तः १२/०९/२०२० पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा समायोजित ओनलाइन 'रघुवंशम् कथं पठेम' इत्यस्मिन् वर्गे कक्षाः स्वीकृताः।

प्रो. महेन्द्रकुमारः दवे

१. २ तः १०/१०/२०२० दिनाङ्केषु S.P. university, V. V. Nagar इति संस्थायां विशिष्टव्याख्यानानि दत्तानि।
२. २८-१०-२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये साहित्यविभागद्वारा वेबीनार मध्ये "तुलसीकृत रामचरित मानसान्तर्गत राजा के स्वरूप वर्णन में वेदो का प्रभाव" विषयकं शोधपत्रं प्रस्तुतम्।

३. २३-१२-२०२० तमे दिनाङ्के श्री सोमनाथ संस्कृत विश्वविद्यालये पुराण विभाग द्वारा वेबीनार माध्यमेन “रामचरितमानस में जीवनमूल्य” विषयकं शोधपत्रं प्रस्तुतम्।

४. श्रीसोमनाथसंस्कृत विश्वविद्यालय द्वारा “रामायण एवं व्यक्तित्व विकास:” तथा “रघुवंशं कथं पठेम" इति ओनलाईन त्रिमासिक कार्यक्रमे मुख्यसंयोजकत्वेन कार्यं कृतम्।

५. श्रीसोमनाथसंस्कृत विश्वविद्यालय द्वारा “रामायण एवं व्यक्तित्व विकास:” ओनलाईन कार्यक्रमे 'रामायणमें मातृ एवं पितृभक्ति' विषयकं व्याख्यानं ७-९-२०२० तमे दिनाङ्के दत्तं तथा २३-९-२०२० दिनाङ्के “अनुशिक्षणम्” दत्तम्।

६. विनयन वाणिज्यमहाविद्यालय: नेत्रंग एवं नीमा महिला महाविद्यालय: गोझारिया इत्यनयो: संयुक्तोपक्रमे २५-१२-२०२० तमे दिनाङ्के आयोजिते “ The Bhagvad Gita in Modern Times” विषयक-राष्ट्रिय-वेब-संगोष्ठ्यां “वर्तमान समय की मार्गदर्शिका श्रीमद् भगवद् गीता” इति विषयोपरि व्याख्यानं प्रस्तुतम्।

७. श्रीसोमनाथसंस्कृतयुनिवर्सिटीद्वारा २५-१०-२०२० तमे दिनाङ्के आयोजिते “गीता-जयन्ती" विषयक सङ्गोष्ठ्यां संयोजकत्वेन कार्यं कृतम्।

प्रो. विनोदकुमारः झा

१. राष्ट्रिय-संस्कृत-संस्थानम् (मानित विश्वविद्यालयः) जयपुरपरिसरेण प्रकाशिते "महाभाष्यस्य प्रथमद्वितीयाऽध्यायस्य सिद्धान्तविमर्शः" इति पुस्तके "अइउण" सूत्रे 'अकारस्य विवृतोपदेशः स्वीकर्तव्य आकारग्रहणार्थः' इति विषयविश्लेषणपूर्वकम् अकारादीनाम् एकत्वप्रतिपादनम्" इति लेखः प्रकाशितः। ISBN - ९७८-९३-८4708-04-7

डॉ. शत्रुघ्नपाणिग्राही

१. ०८/०८/२०२० तः के का शास्त्री पाक्षिक-व्याख्यानमालायाः संयोजकत्वेन कार्यम् अकरोत्।

२. २६/०७/२०२० तमे दिनाङ्के श्री कल्लाजी वैदिक विश्वविद्यालयद्वारा आयोजिते ओनलाइन व्याख्यानमालायाम् "वेदपाठ की विलुप्त परम्परा तथा उनकों पुनरुज्जीवित करने की आवश्यकता एवं प्रयास" विषये व्याख्यानम् अदात्।

३. २०/०९/२०२० तमे दिनाङ्के महर्षि व्यासदेव राष्ट्रियप्राच्यविद्यागवेषणाकेन्द्रेण (ओडिशा) आयोजिते वेबिनारमध्ये आधारपुरुषरूपेण व्याख्यातृरूपेण च उपस्थितः अभवत्।

४. १४/०८/२०२० दिनाङ्के साहित्य संस्थानम् एवं नक्षत्र ज्योतिष संस्थानेन आयोजिते ओनलाइन वेबिनारमध्ये "ब्राह्मणसाहित्ये शतपथब्राह्मणस्य स्थानम्" इति विषये व्याख्यानम् अदात्।

५. Latent mathematics in sanskrit text इति विषये ३०/०९/२०२० तमे दिनाङ्के आयोजिते परिसंवादे "कात्यायनशुल्वसूत्रों में भारतीय गणित की परिचर्या" विषये व्याख्यानम् अकरोत्।

डॉ. पङ्कजकुमार रावलः

१. २५/०८/२०२० दिनाङ्के सौराष्ट्रविश्वविद्यालयविस्तार संस्कृत-अध्यापकपरिषद् राजकोटद्वारा एवं डॉ. आर.एन.वारोतरीया महिला विनयन महाविद्यालय, जामखम्भालियाद्वारा संयुक्ततत्त्वावधाने समायोजितायां संस्कृतज्ञानसङ्गमव्याख्यानमालायां 'भागवते गजेन्द्रमोक्षकथा' इति विषये फेसबुकलाइव व्याख्यानं प्रस्तुतम्।

२. ०६/०८/२०२० दिनाङ्के गुजरातसाहित्यअकादमी एवं श्रीब्रह्मर्षिसंस्कृतमहाविद्यालय, नडियादद्वारा समायोजिते फेसबुकलाइव कविसम्मेलने काव्यपाठः कृतः।

३. ०८/०८/२०२० दिनाङ्के संस्कृतसाहित्यअकादमी गान्धीनगरम्, सरकारी विनयन एवं वाणिज्य कोलेज गाम्भोई, श्रीकृष्णप्रेमसंस्थान हिम्मतनगरम् एवं संस्कृतभारती साबरकांठा इत्येतेषां तत्त्वावधाने संस्कृतसप्ताहमहोत्सवे "पुराणानां भाषा संस्कृतम्" इति विषये फेसबुकलाइव व्याख्यानं प्रस्तुतम्।

४. ०५/०७/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा गुरुपूर्णिमायाः विशिष्टमायोजनं फेसबुकलाइव कार्यक्रमे सञ्चालनम्।

५. २७/०७/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा एवं श्रीगोविन्दगुरुविश्वविद्यालय-गोधराद्वारा श्रावणमासोपलक्ष्ये 'नटराजवन्दना' कार्यक्रमस्यायोजने मुख्यसंयोजकत्वेन कार्यं कृतम्।

६. ०३/०८/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा एवं श्रीगोविन्दगुरुविश्वविद्यालय-गोधराद्वारा समायोजितायां 'नटराजवन्दना व्याख्यानमालायां' "शिवपुराणे नवधाभक्तिः" इति विषये युट्युबलाइव व्याख्यानं प्रस्तुतम्।

७. ०३/०८/२०० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्याल-वेरावलद्वारा समायोजित ओनलाइन शोर्ट टर्म कोर्षमध्ये 'वाल्मीकिमहर्षेः तत्कृतेः रामायणस्य च परिचयः' इत्यस्मिन् विषये व्याख्यानम्।

८. १७/०८/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा समायोजिते 'रामायणे कर्तव्यपरायणता' इति विषये शोर्ट टर्म कोर्ष मध्ये व्याख्यानं प्रस्तुतम्।

९. १७/०८/२०२० दिनाङ्के मुम्बई विद्वत् परिषदि रुद्राष्टाध्यायी व्याख्यानमालायां रुद्राष्टाध्याय्यां पञ्चमेऽध्याये युट्युब-फेसबुकलाइव व्याख्यानप्रस्तुतिः।

१०. ०३/०९/२०२० दिनाङ्के सूर्यपुरे शाण्डिल्यऋषिवेदसंस्कृतमहाविद्यालयद्वारा समायोजित व्याख्यानमालायां "श्रीमद्भागवतमहापुराणे द्वितीयस्कन्धे अमृतत्त्वम्" इति विषये लाइवव्याख्यानं प्रस्तुतम्।

११. ०८/०९/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा समायोजिते शोर्ट टर्म कोर्ष अभ्यासक्रमे 'रामायणे वचनप्रतिबद्धता' इति विषये व्याख्यानं कृतम्।

१२. ११/०९/२०२० दिनाङ्के श्रीभागवतविद्यापीठसंस्थायाः संस्थापकानां प.पू.वि.व.श्रीकृष्णशङ्करशास्त्रिचरणानां पुण्यजन्मतिथौ 'गुर्वष्टकम्' इति स्तोत्रे फेसबुकलाइव व्याख्यानम्।

१३. १४/०९/२०२० दिनाङ्के संस्कृतभारती-जामनगरद्वारा एवं आयुर्वेदविश्वविद्यालयद्वारा समायोजिते कार्यक्रमे नूतनशिक्षानीतिः संस्कृतं च इति विषये फेसबुकलाइव व्याख्यानं प्रस्तुतम्।

१४. २३/०९/२०२० दिनाङ्के जिल्लाशिक्षणाधिकारी कचेरी बोटाद, जिल्लाप्राथमिकशिक्षणसमिति बोटाद, नगरप्राथमिकशिक्षणसमिति बोटाद तथा संस्कृतभारती बोटाद-इत्येतेषां संयुक्तोपक्रमे नूतनशिक्षानीतिः संस्कृतं शिक्षकसज्जता च इति विषये व्याख्यानं प्रस्तुतम्।

१५. २१/०९/२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा समायोजिते शोर्ट टर्म अभ्यासक्रमे 'रामायणे गुरु-शिष्यसम्बन्धः' इति विषये व्याख्यानं प्रस्तुतम्।

१६. २७/०९/२०२० दिनाङ्के श्रीभागवतविद्यापीठट्रस्टद्वारा समायोजिते पवित्राधिकमाससन्दर्भे श्रीमद्भागवतज्ञानसत्र-प्रवचनमालायां श्रीमद्भागवतमहापुराणे चतुर्थस्कन्धः इति विषये फेसबुकलाइव व्याख्यानं प्रस्तुतम्।

१७. १८-१९/०७/२०२० दिनाङ्कयोः श्रीभागवतविद्यापीठट्रस्टद्वारा समायोजिते श्रीपुष्टिरसमहोत्सवे जगद्गुरुश्रीमद्वल्लभाचार्यविरचिते षोडशग्रन्थे 'पञ्चपद्यानि' इति ग्रन्थपुष्पविशेषमादाय फेसबुकलाइवप्रवचनं कृतम्।

डॉ. जानकीशरणः आचार्यः

१. ०३.०८.२०२० – श्रीसोमनाथसंस्कृतविश्वविद्यालयेन “रामायण एवं व्यक्तित्व विकास” इति विषयमधिकृत्य आयोजितस्य प्रथमस्य “ओनलाइन-कार्यक्रमस्य” समन्वयकरूपेण कार्यं विधीयमानम् अस्ति।

२. २५.०८.२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालये Microsoft Teams इति तन्त्रांशम् उपयुज्य अन्तर्जालमाध्यमेन पाठनाय प्रशिक्षणार्थम् आयोजितस्य कार्यक्रमस्य संयोजनं कृतम्।

३. १९.०९.२०२० – श्रीसोमनाथसंस्कृतविश्वविद्यालयेन “स्टूडेण्ट स्टार्ट-अप एण्ड इन्नोवेशन” इति विषयमधिकृत्य आयोजितायाम् ओनगोष्ठ्यां “SSIP परिचय एवं मार्गदर्शन” इति विषये व्याख्यानं प्रदत्तम्।

४. ०३.०९.२०२० – भुज-स्थितस्य श्री-रा. र. लालन महाविद्यालयस्य संस्कृतविभागः अथ च कच्छविभागस्य संस्कृतभारती इति अनयोः संयुक्ततत्त्वावधाने आयोजिते अन्तर्जालीय-परिसंवादे “नूतना शिक्षानीतिः संस्कृतं च” इति विषये मुख्यवक्तृत्वेन व्याख्यानम् अकरोत्।

५. “भाष्यपरम्परा ज्ञानप्रवाहश्च” (सम्पादनम्), श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम् – ISBN - 978-93-83097-43-2

६. ०८.१०.२०२० दिनाङ्के फेसबुक-आमुखपटले “प्रस्थानत्रयी-विमर्शः” इति विषये आमन्त्रितं व्याख्यानं दत्तम्।

७. २१.१०.२०२० – श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ऑगस्टमासतः ऑक्टोबर २०२० यावत् समायोजितस्य “रामायण एवं व्यक्तित्व विकास” इति अल्पकालीन-आन्तर्जालिक-कार्यक्रमस्य (Online Short Term Course) संयोजनं कृतम्।

८. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते शास्त्रपरिचयप्रकल्पे साहित्य-व्याकरण-दर्शनादिषड्विषयाणां विडिओचलच्चित्राणां समीक्षासमित्यां सदस्यत्वेन कार्यं कृतम्।

९. ०३.१२.२०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितस्य अभिविन्यास-कार्यक्रमस्य (Orientation Program for Students under NAAC Preparation) संयोजनं विधायं तत्र विशिष्टं मार्गदर्शनं प्रदत्तम्।

१०. ०८.१२.२०२० - Research and Study Opportunity in Germany इत्याख्ये आन्तर्जालिके संवादकार्यक्रमे विश्वविद्यालयपक्षतः भागग्रहणम्।

११. ०९ एवं ३० दिसम्बर २०२० दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजिते UGC NET-JRF इति प्रशिक्षणवर्गे एवं च ०३.१२.२०२० दिनाङ्के "षोडषसंस्कारः" इति अल्पकालीन-आन्तर्जालिक-कार्यक्रमे आमन्त्रितवक्तृत्वेन व्याख्यानं प्रदत्तम्।

डॉ बी उमामहेश्वरी

१. श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ३१.०८.२०२० तः ०६.०८.२०२० दिनाङ्केषु समायोजितसंस्कृतसप्ताहोत्सवान्तर्गत-वक्तृत्वस्पर्धायां निर्णायिकारूपेण कार्यं विहितम्।

२. श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा ०५.०९.२०२० दिनाङ्के आयोजितस्य शिक्षकदिवसस्य संयोजिकात्वेन कार्यं विहितम्।

३. उत्तरप्रदेशसंस्कृतसंस्थानद्वारा 'संस्कृतस्य महत्त्वम्' इति विषयमाश्रित्य २१.०८.२०२० दिनाङ्के आयोजिते अन्ताराष्ट्रियसंस्कृतसमेलने भागं गृहीतम्।

डॉ. रमेशचन्द्रः शुक्लः

१. २७/०८/२०२० तः ०९/०९/२०२० पर्यन्तम् मौलाना आजाद उर्दू विश्वविद्यालयतः रिफ्रेशर कोर्स कृतवान्, तत्र ए ग्रेड च लब्धवान्।

२. १०/०८/२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालयेन आयोजितस्य विश्वसिंहदिवसस्य संयोजनम् अकरोत्।

३. राष्ट्रवादी लेखक संघ द्वारा १९/०७/२०२० तमे दिनाङ्के आयोजिते कार्यक्रमे सृष्टिविज्ञानम् इति विषये व्याख्यानम् अकरोत्।

४. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रकाशितायां शोधज्योतिः इति पत्रिकायां संस्काराणाम् आधुनिकयुगे महत्त्वम् इति विषयेन शोधपत्रं प्रकाशितम्।

डॉ. कार्तिकपण्ड्या (संशोधनाधिकारी)

१. गुजरातसर्वकारस्य SHODH (2019-20) कृते विश्वविद्यालयस्य संयोजकरूपेण कार्यं व्यधामयि।

२. फ़ेब्रुआरी-मार्च २०२० मासे नूतनशिक्षाशास्त्रीमहाविद्यालयार्थं Four(4) Years Innovative & Integrated शास्त्री-शिक्षाशास्त्री अभ्यासक्रमसमित्याः संयोजकत्वं विहितम्।

३. Gujarat State Institutional Rating Framework 2019-20 (KCG) कृते विश्वविद्यालयस्य संयोजकरुपेण कार्यम् अकरोत्।

४. All India Survey on Higher Education Survey (MHRD,New Dilhi) 2019-20 कृते विश्वविद्यालयस्य नोडल-अधिकारिरूपेण कार्यं व्यधायि एवं समग्रगुर्जरप्रदेशे प्रथमं क्रमं प्राप्तवान्।

५. NAAC कृते विश्वविद्यालयस्य सहसंयोजकरूपेण कार्यं व्यधायि।

६. विश्वविद्यालयस्य प्रकाशनविभागद्वारा सप्तग्रन्थानां प्रकाशने सहायकसम्पादकरूपेण समन्वयकरूपेण च कार्यमकरोत्।

श्रीनित्यानन्दः ओझा

१. १०/०८/२०२० दिनाङ्के श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन आयोजितस्य विश्वसिंहदिवसस्य संयोजनम् अकरोत्।

२. ३१/०७ तः ०६/०८/२०२० तमेषु दिनाङ्केषु आयोजितस्य संस्कृतसप्ताहोत्सवस्य संयोजकत्वेन कार्यम् अकरोत्।

श्रीजिगरः भट्टः

१. श्रीगोविन्दगुरु-विश्वविद्यालयेन ११/०७/२०२० आयोजिते ओनलाइन कविसम्मेलने स्वरचितकाव्यानां प्रस्तुतिः कृता।

२. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन ३१/०७/२०२० तः ०६/०८/२०२० तमेषु दिनाङ्केषु आयोजिते ओनलाइन संस्कृत-सप्ताहस्य संयोजकत्वेन कार्यम् अकरोत्।

३. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १०/०७/२०२० तमे दिनाङ्के आयोजितस्य पूर्वच्छात्रसम्मेलनस्य संयोजनम् अकरोत्।

४. श्रीसोमनाथसंस्कृतविश्वविद्यालये नूतनप्रविष्टच्छात्राणां कृते १७/०७/२०२० दिनाङ्कतः २०/०८/२०२० दिनाङ्कं यावत् मासव्यापी संस्कृतसम्भाषणवर्गः प्रचालितः।

५. श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य ओनलाइन शोर्टटर्म त्रिमासिकयोजनायाः रघुवंशम् (द्वितीयसर्गः) कथं पठेम इत्यस्याः संयोजकत्वेन कार्यम् अकरोत्। अस्यामेव योजनायां षट् व्याख्यानानि प्रदत्तवान्।

६. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रकाशितस्य संस्कृतवाङ्मये नगररचना इति पुस्तकस्य सम्पादकत्वेन कार्यम् अकरोत्। (ISBN 978-93-83097-40-1)

७. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रकाशिते संस्कृतवाङ्मये नगररचना इति पुस्तके संस्कृतवाङ्मयानुसारं नगरे सामाजिकभवनविचारः इति शोधपत्रं प्रकाशितम्। (ISBN 978-93-83097-40-1)

८. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रकाशितायां शोधज्योतिः इति शोधपत्रिकायाम् रसगङ्गाधरे उत्तमोत्तमकाव्यस्योदाहरणे व्यङ्ग्यविमर्शः इति शीर्षकेण शोधपत्रं प्रकाशितम्। (ISSN 2350-0700)

९. श्रीसोमनाथसंस्कृतविश्वविद्यालयेन प्रकाशितायाः शास्त्रपरिचायिकायाः साहित्यपरिचयविभागस्य लेखकत्वेन कार्यम् अकरोत्। (ISBN 978-93-83097-44-9)

डो.आशाबेन जी माढक:

१. दिनाङ्कः -१०/०७/२०२० श्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा आयोजितस्य स्पन्दनम् online पूर्वछात्रसम्मेलनस्य संयोजिकारूपेण कार्यं संपादितम् एवं च कार्यक्रमे वृत्तकथनम् कृतम्।

२. दिनाङ्कः- ३०/०८/२०२० तः ०६/०८/२०२० पर्यन्तं श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजितस्य "संस्कृतसप्ताहोत्सवः" इत्यस्य संयोजिकारूपेण कार्यं संपादितम् एवं च कार्यक्रमे एककसंस्कृतगीतस्पर्धा आयोजिता , स्पर्धानां विजेतॄणां नामोद्घोषणं च कृतम्।

कु. अपूर्वा अग्रवालः

१. ०५/०७/२०२० तमे दिनाङ्के विश्वविद्यालये 'गुरुपूर्णिमामहोत्सवः' इत्यस्यायोजने सहसंयोजिकारूपेण कार्यं विहितम्।

२. १०/०७/२०२० तमे दिनाङ्के 'स्पन्दनम्' online पूर्वछात्रसम्मेलनम् इत्यस्य संयोजिकारूपेण कार्यं सम्पादितम्।

३. ३१/०७/२०२० तः ०६/०८/२०२० पर्यन्तम् "संस्कृतसप्ताहोत्सवः" इत्यस्य संयोजिकारूपेण कार्यं सम्पादितम्।

४. ३१/१०/२०२० तमे दिनाङ्के विश्वविद्यालयद्वारा "सरदारपटेलजन्मजयन्ती" इत्यस्यायोजने संयोजिकारूपेण कार्यं कृतवती।

५. २३/१२/२०२० तमे दिनाङ्के पुराण-विषयकराष्ट्रीयवेबसङ्गोष्ठ्यां " पुराणधर्मशास्त्रयोः वेदारम्भ-समावर्तन-संस्काराभ्यामादर्शजीवनस्वरूपम्" इति विषयं स्वीकृत्य शोधपत्रमपठत्।

६. गुजरात-विद्यापीठद्वारा आयोजितां गुजरातविनयपरीक्षामुत्तीर्णवती।

कु. विदुषी बोल्ला

१. भट्टनागेशरीत्या लक्षणातत्त्वविमर्शः इति विषयमाधृत्य शोधशौर्य्यमिति (ISSN No: 2581-6303, Impact Factor : 5.2, International Scientific Refereed Research Journal) पत्रिकायां शोधपत्रस्य प्रकाशनमकरोत्।

२. २७-१०-२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजितायां व्याकरण-विषयकराष्ट्रियवेबसङ्गोष्ठ्यां तेलुगुव्याकरणेन सह संस्कृतव्याकरणस्याभिसम्बन्धः इति विषयमाश्रित्य पत्रं प्रास्तवीत्।

३. २४-१२-२०२० तमे दिनाङ्के श्रीसोमनाथसंस्कृतविश्वविद्यालये आयोजितायां वेदविषयक-राष्ट्रियवेबसङ्गोष्ठ्यां वेदार्थप्रतिपत्तये पाणिनीयव्याकरणदृष्ट्या स्वराणां विवेचनम् इति विषयमाश्रित्य पत्रमपठत्।

४. व्याकरणशोर्टटर्मपाठ्यक्रमस्य संस्कृतवाक्याभ्यासस्य संयोजकत्वं करोति।

गुजरातसर्वकारेण गुर्जरभाषायाः आयोजितविनयपरीक्षा उत्तीर्णा।

## राष्ट्रिय-मूल्याङ्कन-प्रत्यायन-परिषदः समितेः नियुक्तिः

विश्वविद्यालये सम्प्रति राष्ट्रिय-मूल्याङ्कन-प्रत्यायन-परिषदः सज्जता प्रचलति। तत्र अस्याः समितेः मुख्यसंयोजकरूपेण डॉ. ललितकुमारपटेल-महोदयस्य नियुक्तिः अभवत्। तेन सह डॉ. कार्तिकपण्ड्यामहोदयस्य श्रीरवीन्द्रकालेमहोदयस्य च सहसंयोजकरूपेण नियुक्तिः अभवत्। एतस्मिन् सन्दर्भे माननीयकुलपतिवर्यः नियुक्तानाम् अधिकारिणाम् अभिनन्दनम् अकरोत्।



**Dr. Kartik Pandya**
NAAC
Asst. Co-ordinatior



**Dr. Lalitkumar Patel**
NAAC
Co-ordinatior



**Ravindra Kale**
NAAC
Asst. Co-ordinatior

## विश्वविद्यालये नवनियुक्तिः



कु. विदुषी बोल्ला
सहायकाचार्या - व्याकरणम्



श्री भार्गव पुरोहित
मुख्यः अभियन्ता

## विश्वविद्यालयस्य छात्रप्रतिभा
## २०२० तमे वर्षे युजीसी नेट परीक्षायाम् उत्तीर्णाः छात्राः



श्री ऋषभ देरासरी



कु. धरमबेन कछोट



श्री रवि रादडीया



श्री केशव कुमार पाण्डेय



श्री कृष्ण कुमार पाण्डेय